मुकुन्दानन्दनाम्ना मे भाणेन परितोषितः ।
कमलाकामनः कामं कल्लोलयतु मङ्गलम् ॥
कृतिं लसदलंकृतिं रसविदो बुधा ये मम
प्रसन्नहृदया दयाजलधयो बहूकुर्वते ।
तदीयपदपद्मयोरयमयं प्रणामाञ्जलिः
सरोजमुकुलाकृतिः शिरसि सन्ततं धार्यते ॥

Colophon:

इति काशीपतिविरचितोऽयं मुकुन्दानन्दभाणः समाप्तः ॥

R. No. 886.

Paper. 13⅝ × 5½ inches. Foll. 6. Lines, 19 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

स्वप्रकाशवादार्थः.

SVAPRAKĀŚAVĀDĀRTHAḤ.

Same work as that described under No. 4534 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. 887.

Paper. 9 × 3¼ inches. Foll. 11. Lines, 13 in a page. Telugu. Fair.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

काकतालीयवादार्थः.

KĀKATĀLĪYAVĀDĀRTHAḤ.

By Śambhudāsa. Same work as that described under R. No. 675 *ante*, but with the addition of the following stanza at the end.

Complete.

शम्भुदासकृता काकतालीयार्थोपवर्णनम् ।
पितरं बालभाषेव प्रीणात्वेषा सुधीजनम् ॥

R. No. 888.

Paper. 11¼ × 4½ inches. Foll. 29. Lines, 12 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

(*a*) सौभाग्यकल्पद्रुमः.

SAUBHĀGYAKALPADRUMAḤ.

Foll. 1*a*—26*b*.

A work on mysticism and rituals connected with the worship of Śakti: by Mādhavānandanātha. The portion contained in this MS. deals with the initiation necessary for making one fit for performing the worship of Śakti. This MS. is said to have been copied by Cayana Nārāyaṇa Śāstri.

Incomplete.

Beginning:

गुरोः कटाक्षवीक्षाभ्यां दीक्षां प्राप्य तु यत्कृपाम् ।
साधकः शिवरूपः स्यात्तामसादिकमन्तरा ॥

अथ पूर्वोक्तानुष्ठानयोग्यतासिद्ध्यै दीक्षाविधिर्निरूप्यते—

शान्तो ह्यलुब्धः सदयः सुकृत्यागमतत्त्ववित् ।
पूर्वाश्रमी परो वर्णः शूद्रोऽनेन गुरुर्भवेत् ॥
स्यान्नैष्ठिकब्रह्मचारी स्त्री चापि तु सभर्तृका ।
गुरुरेवंविधः प्रोक्तस्तत्त्ववित्तत्र चोत्तमः ॥

End:

अयं हि परमो योगः कालमार्गो महेश्वरि ।
असिधाराव्रतत(स)मो मनोनिग्रहहेतुकः ॥
स्थिरचित्तस्य सुलभस्सफलस्तूर्णसिद्धिदः ।
अन्यस्य विषमो दुःखहेतुस्स्यात्परमेश्वरि ॥
एवमुपासकधर्मान् ज्ञात्वा उपासते शिवम् ।
श्रीमाधवानन्दनाथकृते सौभाग्यपूर्वके ।
कल्पद्रुमे सप्तम(स्तु)स्कन्धो दीक्षाफलप्रदः ।

Colophon:

इति श्रीसौभाग्यकल्पद्रुमे चतुर्थः स्कन्धः ॥

(*b*) **गन्धोत्तमानिर्णयः.**

GANDHŌTTAMĀNIRṆAYAḤ.

Foll. 27*a*—29*a*. Fol. 29*b* is left blank.

This appears to treat of the method by which salvation is obtainable by a follower of the Kaula sect of the Śakti worshippers.

Incomplete.

Beginning:

अथ गन्धोत्तमां व्याख्यास्यामः—

ध्यात्वा श्रीत्रिपुरां हृदब्जकुहरे नत्वा गणेशं गुरुं
श्रीविश्वेश्वरसंज्ञकं स्वजनकं वेदागमार्थानुगम् ।

मन्वादिस्मृतिसंग्रहप्रकरणान् दृष्ट्वा पुराणांस्तथा
कुर्वेऽहं गुरुसेवको लघुतरं गन्धोत्तमानिर्णयम् ॥

परमकारुणिकेन महामहेश्वराचार्यवर्येण श्रीगुरुणोपदिष्टः कुलधर्मानभिज्ञो धर्मशास्त्रनिपुणः कश्चिच्छिष्यः संदिहानो मोक्षमार्गाभिलाषः संसारभयभीतो जननमरणाकुलः संसारमसारं ज्ञात्वा गुरुमाभिश्रित्य भक्तिपूर्वं प्रणिप्रत्याह—भो भगवन् मम मोक्षमार्गोपदेशमन्त्रो भवता दत्तः। तस्य पद्धतिमप्युपदिशेति विज्ञापितः सन् गुरुस्तां पद्धतिं शिष्यायाध्यापयत्। ब्राह्मे मुहूर्ते त्वारभ्य सामान्यकलशस्थापनपर्यन्तं कथयित्वा कलशस्थापनं कुर्यादित्याह। तल्लक्षणमाह तन्त्रसारे।

End:

मनुरेवाह—

न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महत्फलम् ॥

ननु एकेन ग्रन्थकृता एकस्यैव वस्तुनो विधानत्रयं कथमुक्तमेकत्र। तस्मात् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्।

R. No. **889.**

Paper. 7 × 3 inches. Foll. 6. Lines, 9 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

(*a*) स्वत्वविचारः.

SVATVAVICĀRAḤ.

Foll 1*a*—4*b*.

An investigation into the meaning and significance of स्वत्व (ownership) indicated by the genitive case termination.

Beginning:

स्वत्वं तावत् स्वत्वमुत्पन्नं विनष्टं तव स्वं मम स्वं ब्रह्मस्वमित्यादिप्रतीतिसिद्धं पदार्थान्तरम्। तच्च वृत्तिनियामकविशेषणताविशेषेण स्वर्णादि निष्ठं स्वर्णे स्वत्वमित्यादिप्रत्ययात्। निरूपकताख्यविशेषणताविशेषेण च स्वामिनिष्ठम्।

End:

स च विलक्षणविषयतासम्बन्धेनात्र विषयत्वमिदं विषय इत्यादिव्यवहारात् विलक्षणविशेषणतया चात्र विषयित्वमिदं विषयी इत्यादिव्यवहार इत्याहुः॥

Colophon:

स्वत्वविचारस्समाप्तः॥

(*b*) निर्धारणषष्ठ्यर्थविचारः.

NIRDHĀRAṆAṢAṢṬHYARTHAVICĀRAḤ.

Foll. 5*a*—6*b*.

An investigation into the meaning of the genitive case ending which specifies a particular person or thing out of many.

Complete.

Beginning:

ननु नराणां क्षत्त्रियश्शूरतम इत्यादौ निर्धारणस्थले कीदृगन्वयबोध इति चेत् निर्धारणषष्ठ्यादेर्भेदोऽभेदश्चार्थः। तत्र भेदो निर्धार्यपदार्थस्य विशेष्यभूतप्रकृत्यर्थविशेषणतया प्रकृत्यर्थविशेष्यीभूतान्वयितावच्छेदकावच्छेदेन गुणक्रियाद्यवच्छिन्नवाचकपदार्थविशेषणतया च द्वेधान्वेति।

End:

पितृचरणास्तु—निर्धारणषष्ठ्यादेरभेदमात्रमर्थः। शूरतम इत्यादेः क्षत्त्रियान्यनरव्यापकभेदप्रतियोगितावच्छेदकविशिष्टतादात्म्यसम्बन्धेन नराभिन्नक्षात्त्रियादावन्वय इति नातिप्रसङ्ग इति प्राहुरिति दिक्॥

Colophon:

इति निर्धारणषष्ठीस्थलीयशाब्दबोधरहस्यम् ॥

R. No. **890.**

Paper. 9½ × 4¼ inches. Foll. 42. Lines, 11 in a page. Telugu. Much injured.

Purchased in 1913-14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

सारस्वतप्रक्रिया.

SĀRASVATAPRAKRIYĀ.

By Anubhūtisvarūpācārya. Same work as that described under No. 1546 of the D.C.S. MSS., Vol. III.

Wants many leaves in the middle and end.

R. No. **891.**

Paper. 11¼ × 4¾ inches. Foll. 58. Lines, 13 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

सप्तशतीव्याख्या.

SAPTAŚATĪVYĀKHYĀ.

Foll. 1*a*—57*b*.

A commentary on the Saptaśatī which is a eulogy in seven hundred stanzas on the goddess Caṇḍikā or Dēvī: by Nāgōjibhaṭṭa, son of Śivabhaṭṭōpādhyāya and Satī. This MS. is said to have been copied by a scribe named Rāma, in Benares, the copying having been completed on Thursday, the 6th day of the dark fortnight of the Āṣāḍha month in the year Prajōtpatti.

Complete.

Beginning :

मार्कण्डेयेन क्रोष्टुकिं भागुरिं प्रत्युक्तं स्तोत्रं जैमिनिं प्रति पक्षिरूपैर्मुनिपुत्रैरुक्तं मार्कण्डेयपुराणे। तद्यथामति व्याचक्ष्महे। तत्रादौ व्याख्यास्यमानस्तोत्रे स्तूयमानदेवतास्वरूपं प्राधानिकरहस्याख्ये ग्रन्थविशेषे उक्तं विविच्य प्रदर्श्यते। तत्रादौ राज्ञः प्रश्नः—

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥ इति ॥

अत्र एतेषामिति निर्धारणे षष्ठी।

End :

अन्ते मनुरित्यनेन सावर्णिरित्यारभ्य सावर्णिर्भविता मनुः इत्यन्तोऽयं महामालामन्त्र इति सूचयतीति। तदुक्तं लक्ष्मीतन्त्रे—

'सम्यग्घृदि स्थिता सेयं जन्म..मौवलिस्तुतिः।
एतां द्विजमुखाज्ज्ञात्वाधीयमानो नरः सदा ॥
विधूय निखिलां मायां सम्यग्ज्ञानं समश्नुते।
सर्वास्संपद आप्नोति धुनोति सकलापदः' ॥

इति सर्वेष्टासिद्धिः ॥

Colophon :

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्टकृते सप्तशतीव्याख्याने त्रयोदशोऽध्यायः समाप्तिमगमत् ॥

सामविधिब्राह्मणे अथ यः कामयेत पुनर्न प्रजायेयमिति इत्यपुनर्भवमधिकृत्य तदनुसन्धेयोऽस्या मन्त्र उक्तः। ओं रात्रिं प्रपद्ये पुनर्भूर्मयोभूः कन्यां शिखण्डिनीं

* * * *

अत्र निष्कदक्षिणायां दरिद्राणां चतुःसुवर्णमितं हेम। सुवर्णमशीतिगुञ्जामितम् ॥

Colophon :

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्टकृते मार्कण्डेयपुराणान्तर्गतसप्तशत्याख्यचण्डीस्तोत्रव्याख्याने चण्डीस्तोत्रप्रयोगविधिः समाप्तः ॥

Foll. 57*b* and 58*a* contain a few lines regarding Śaivamantra and 58*b* contains a passage stating that the work Saptaśatīvyākhyā of Nāgōjibhaṭṭa is finished.

R. No. 892.

Paper. 12½ × 5 inches. Foll. 13. Lines, 18 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

ब्रह्मसूत्रसारसंग्रहः.

BRAHMASŪTRASĀRASAṄGRAHAḤ.

Foll. 1*a*—13*a*. Fol. 13*b* is left blank.

By Prajñānēndrasvāmin. Same work as that described under R.Nos. 399(*c*) and 720 *ante*.

Contains up to the end of the third Pāda in the third Adhyāya.

R. No. 893.

Paper. 14 × 5½ inches. Foll. 365. Lines, 18 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

ब्रह्मसूत्रभाष्यव्याख्यानम्—ब्रह्मविद्याभरणम्.

BRAHMASŪTRABHĀṢYAVYĀKHYĀNAM : BRAHMAVIDYĀBHARAṆAM.

By Advaitānanda. Same work as that described under No. 4671 of the D.C.S. MSS., Vol. IX, but this is complete

This manuscript is said to have been copied by one Pāvaṅka-Hanumat, the copying having been completed on Monday, the 13th day of the dark fortnight of the Āṣāḍha month in the year Prabhava.

Complete.

Beginning:

शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावये ॥
वेदान्तनिकुरुम्बेण तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु नः ॥
स्वानन्दाम्बुधिमग्नचित्तमनिशं निर्धूतमायामलं
कारुण्यार्जवशान्तिसौरभममुं देव्या गिरा सेवितम् ।
रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा
चित्ते संकलयामि वेदशिरसस्तत्त्वावबोधाप्तये ॥
मुग्धं मामनुगृह्य यः करुणया तुर्योक्तिप्रस्फुर-
द्भासां वेदवतीं विकल्पगलितां विद्यां ददौ चिन्मयीम् ।
भूमानन्दपदास्थितो गुरुरसौ पूज्याधिपूज्यः सदा
चेतो मे कुरुतादलंकृतमतिस्वच्छैः स्वपादाम्बुजैः ॥

अथातो ब्रह्मजिज्ञासा । अनेन सूत्रेण साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्म जिज्ञासितव्यमिति प्रतिपाद्यते । एतत्सूत्रावतारिकारूपेण युष्मदस्मत्प्रत्ययगोचरयोरित्यादिना सर्वे वेदान्ता आरभ्यन्ते इत्यनेन भाष्येण कर्तृत्वादिबन्धस्याक्षेपसमाधानाभ्यां मिथ्यात्वं प्रतिपाद्यते ।

End:

एतेन सर्वे व्याख्याता व्याख्याता इत्यादौ अध्यायपरिसमाप्तिद्योतनाय पदमेवाभ्यस्यते । कृत्स्नसूत्राभ्यासस्तु शास्त्रपरिसमाप्तिं द्योतयतीत्याह — सूत्राभ्यास इति ।

मध्येपलाशविपिनमध्यासीनं सहोमया ।
ओंकारस्वरसंवेद्यं भावयामि सदाशिवम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभूमानन्दसरस्वतीचरणानुग्रहलब्धसारस्वतीपदस्वनिरतिशयौदासीन्यादिगुणरत्नखचितयतिकुलोत्तंसश्री-

रामानन्दतीर्थमुखारविन्दनिर्गतशारीरकसूत्रभाष्यार्थस्वर्धुनीप्रवाहनिमज्जन-सुहितस्याद्वैतानन्दस्य कृतौ शारीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाभिधायां चतुर्थाध्यायस्य चतुर्थः पादः । शास्त्रं समाप्तम् ॥

R. No. 894.

Paper. 12¾ × 8½ inches. Foll. 39. Lines, 27 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

केरलमाहात्म्यम्.

KĒRALAMĀHĀTMYAM.

Foll. 1*a*—39*a*. Fol. 39*b* is left blank.

Same work as that described under No. 2393 of the D.C.S. MSS, Vol. IV, Part II, but this is complete.

Complete.

End :

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् ।
भार्गवस्यानुचरितं यः पठेद्दिवमाप्नुयात् ॥
सूतं महात्मानमिदं बभाषिरे संपूज्य पीठे सहसैव दक्षिणाम् ।
ददुश्च सर्वे मुनयो नृपोत्तमाः पुष्पैश्च वस्त्रैरनिशं सुपूजिताः ॥

Colophon :

इत्यार्षे श्रीमत्परशुरामायणे अगस्त्यसंहितायामाग्नेयपुराणे भूगोलखण्डे विष्णुरहस्ये उपदेशकाण्डे केरलमाहात्म्ये गर्गयुधिष्ठिरसंवादे त्रिसहस्रत्रिशताधिकायां चतुःशततमोऽध्यायः ॥

R. No. 895.

Paper. 8 × 6 inches. Foll. 18. Lines, 37 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

शब्देन्दुशेखरक्रोडपत्रम्.
ŚABDĒNDUŚĒKHARAKRŌḌAPATRAM.

A critical tract on the Laghu-Śabdēnduśēkhara of Nāgēśabhaṭṭa described under No. 1414 of the D.C.S. MSS , Vol. III.

Contains a small portion in the beginning of the Uttarārdha.

Beginning:

प्रथन्त इति । प्रशस्तानि भवन्तीत्यर्थः । विघ्नविधाताद्यर्थमिति आदिपदेन प्रचारः । निबध्नातीति निबन्धनं श्लोकरूपेण कथनम् । मानसिकध्यानेन स्तवपाठेन वा चिकीर्षितग्रन्थसमाप्त्यादेः सुसाधत्वेम ग्रन्थे श्लोकरूपेण लेखनं शिष्या अप्येवं मङ्गलं कुर्युरिति बुद्ध्यैवेति भावः । वेदाध्ययनकर्तृत्वमिति । छन्दोऽधीत इत्यर्थे छन्दःशब्दात् घस्प्रत्ययः प्रकृतेः श्रोत्रादेशश्च निपात्यते । एवं सति अध्येत्रर्थे नाप्राप्तस्य तदधीते तद्वेदेत्यणो घसा बाधापत्त्या छान्दस इति रूपासिद्धिप्रसङ्गात् ।

End:

नन्वेषां स्थानिवद्भावेन प्रत्ययत्वे सिद्धेऽपि देशांशे निराकाङ्क्षत्वेऽपि चेति ग्रन्थेन लकारविधायकेषु प्रत्ययः परश्चेत्यनयोः संबन्धोऽङ्गीकृत इत्यायातम् । परं त्वाद्युदात्तश्चेत्यस्य संबन्धो न युक्तः, लकाराणां स्वरयोग्यताविरहात् । तथाचाद्युदात्तश्चेत्यस्यासंबन्धेऽपि प्रत्ययः परश्चेत्यनयोर्लकारविधौ संबन्धकल्पनवत् लादेशविधावपि.

R. No. **896.**

Paper. $6\frac{1}{4} \times 4\frac{1}{2}$ inches. Foll. 30. Lines, 12 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

Fol. 1*a* gives the name of the former owner of the MS. as Pēri Subrahmaṇya Śāstri and that of the work as Rājapraśasti.

राजप्रशस्तिः.
RĀJAPRAŚASTIḤ.

Foll. 5*a*—20*b*. Foll. 1*b*—2*b* are left blank.

A eulogy on kings generally : by a Brahmin, named Tārānātha.

The transcription of this work is said to have been completed on the 13th day of the dark fortnight of the Vaiśākha month in the year Pārthiva.

Complete.

Beginning :

स्वस्ति श्रीमन्महाराजाधिराजेषु निवेदनम् ।
तारानाथद्विजस्येदमाशीराशिपुरस्सरम् ॥
कमला कमलालयालये लसतात्तेऽचपला निरन्तरम् ।
वदने वचनाधिपालिका समरे तेऽग्रसरास्तु कालिका ॥
चित्तसद्मनि तवास्तु सन्ततं वासुदेवपदवाच्यधाम तत् ।
येन सर्वमिदमाततं ततं पालितं तदनु संहृतं क्रमात् ॥
योगमार्गनिरतेन चेतसा विश्वरूपमनघं विभावय ।
तेन लब्धपुरुषार्थसार्थकं सार्थकं जननमस्तु भाव ते ॥

End :

तव गुणनिकरान्तं नैव गन्तुं समर्था
वयमिति विरताः स्मः श्रान्तियोगाच्च राजन् ।
कलयसि गुणलेशं दोषजालं जहासि
गुणिगणगुणलेशादाशुतोषो भवान्यत् ॥
गुणानामाधारे गुणिजनगुणग्राहकवरे
दयासारे पारेवचनमनुवर्णैकनिलये ।
ममैषा विज्ञप्तिर्नयनपदवीमेत्य सहसा
सदा सानन्दं तं विरचयतु नित्यं रमयतु ॥
प्रशस्तिपत्रिका यत्नाच्छ्रीतारानाथशर्मणा ।
द्विजेन रचिता तुष्ट्यै नृपस्यास्तु चिरं शिवम् ॥

Colophon :

इति श्रीराजप्रशस्तिः ॥

Foll. 21 to 29*a* contain the latter portion of the sixth Taraṅga of the Kathāsaritsāgara as rewritten in prose by Jīvānanda-Vidyāsāgara. Fol. 21*b* is left blank. In foll. 29*b* and 30*a*, the scribe adds two stanzas requesting to be excused for the mistakes in the transcript. Fol. 30*b* is left blank.

R. No. **897.**

Paper. 11¾ × 5⅝ inches. Foll. 36. Lines, 12 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

By Śaṅkarācārya. Same work as that described under No. 505 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **898.**

Paper. 13⅝ × 5¼ inches. Foll. 126. Lines, 17 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

ब्रह्मसूत्रभाष्यम्—भाष्यरत्नप्रभासहितम्.

BRAHMASŪTRABHĀṢYAM WITH BHĀṢYARATNA-PRABHĀ.

By Śaṅkarācārya. The text is the same as that described under No. 4659 and the commentary, which is by Gōvindānanda, has been described under No. 4679 of the D.C.S.MSS., Vol. IX.

Wants the beginning in the first Pāda of the first Adhyāya and breaks off in the second Pāda of the second Adhyāya.

R. No. **899.**

Paper. 10⅝ × 4½ inches. Foll. 46. Lines, 15 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

(*a*) बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Foll. 1*a*—28*b*.

Same work as that described under No. 633 of the D.C.S. MSS., Vol. I, Part III.

Almost complete.

(*b*) छान्दोग्योपनिषत्.

CHĀNDŌGYŌPANIṢAD.

Foll. 29*a*—46*b*.

Same work as that described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Wants one leaf in the middle ; otherwise complete.

R. No. **900.**

Paper. 11¾ × 5 inches. Foll. 37. Lines, 12 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

नीलकण्ठविजयचम्पूः.

NĪLAKAṆṬHAVIJAYACAMPŪḤ.

A work in prose and verse describing the heroic part played by Śiva in swallowing the poison produced at the time of the churning of the ocean by the Dēvas and the Asuras. From another MS. of this work in the Library, it is made out that this work was written after the expiry of 4738 years of the Kaliyuga, *i.e.*, in the year 4739. By Nīlakaṇṭhadīkṣita, son of Nārāyaṇadīkṣita and Bhūmidēvī and grandson of Āccādīkṣita, who is the brother of Appayadīkṣita.

The copying of this MS. was made by Kṛtti Vaṇḍi Subbarāyar, the copying having been completed on Wednesday, the 10th day of the dark fortnight of the Āśvija month in the year Pramōda.

Contains Āśvāsas two to five.

Beginning :

ततः शतमखादयो युधि विरोधिभिर्निर्जितां
श्रियं पुनरभीप्सवः क्रतुभुजो भुजोपार्जिताम् ।
विचित्रमणिसुन्दरं विपुलकन्दरं मन्दरं
समेत्य सहसानगन्निमिषवत्सहस्रं समाः ॥

तत्र च वसतां तपोधनानामध्वरहविर्भागमपहरत्सु दूतमुखेन दानवेषु अकाले वा यष्टुमयज्ञेन वा रहसि प्रदातुमप्यर्थनयाप्यसंमन्यमानेषु शास्त्रैकतरणेषु तापसेषु तप्यमानाः क्षुधा विबुधा हुत्वा हवींषि हुतवहे दत्तानि तेनैव पुनस्तान्युपभुञ्जानाः कालं महान्तमतिवाहयांचक्रिरे ।

* * * *

Colophon :

इति श्रीनीलकण्ठदीक्षितविरचिते नीलकण्ठविजये द्वितीयोऽयमाश्वासः ॥

End :

वाचं व्याकुरुते चिरन्तनगिरं मीमांसते चोभयीं
पान्थः काव्यपथेषु पादकमले सक्तः पुरारेरिति ।
मामेतत्कथयिष्यतीति रचितं काव्यं मया तत्पुन-
स्तावद्वक्ष्यति वा न वा तदुपरि न्यस्तः समस्तो भरः ॥

Colophon :

इति श्रीनीलकण्ठविजये पञ्चमाश्वासः समाप्तः ॥
नीलकण्ठचम्पूः समाप्ता ॥

R. No. **901.**

Paper. $5\frac{5}{8} \times 3\frac{5}{8}$ inches. Foll. 25. Lines 7—14 in a page. Telugu. Slightly injured.

Presented in 1913-14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

Fol. 1*a* gives the name of the scribe as Vēṅkaṭācalapati.

(*a*) बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.

BĀLĀTRIPURASUNDARĪSAHASRANĀMASTŌTRAM.

Foll. 2*a*—15*a*. Foll. 1*b*, 12*b*, 13*b*, 14*b* and 15*b* are left blank.

Same work as that described under No. 9147 of the D.C.S. MSS., Vol. XVII.

Complete.

(*b*) बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्.

BĀLĀTRIPURASUNDARYAṢṬŌTTARAŚATANĀMA-STŌTRAM.

Foll. 16*a*—19*b*.

Same work as that described under No. 9157 of the D.C.S. MSS., Vol. XVII.

Complete with Mantra.

(*c*) गायत्रीभुजङ्गः.

GĀYATRĪBHUJAṄGAḤ.

Foll. 20*a*—22*b*. The remaining foll. are left blank.

Same work as that described under No. 9414 of the D.C.S. MSS., Vol. XVIII.

Complete.

R. No. **902.**

Paper. 11 × 4¾ inches. Foll. 12. Lines, 11—17 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. Sītārāma Śāstri of Avanigedḍa.

(*a*) सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Foll. 1*a*—4*b*.

By Śaṅkarācārya. Same work as that described under No. 48 of Seshagiri Sastri's Report on the Search for Sanskrit and Tamil MSS., No. 2.

Contains forty-six stanzas.

(*b*) बिल्हणचरितम्.

BILHAṆACARITAM.

Foll. 5*a*—12*b*.

Same work as that described under R.No. 609(*a*) *ante*, but this is complete.

End:

सुखेन राजा कविराट् कुमारी लक्ष्मीगृहे नाम पुरे च नित्यम् ।
स्वकीयराज्यं परिपाल्य साक्षाल्लक्ष्मीपतेश्चारुदृशा च तस्थुः ॥

Colophon:

बिल्हणाख्यं शृङ्गारकाव्यं संपूर्णम् ॥

R. No. **903.**

Paper. 8⅛ × 6½ inches. Foll. 85. Lines, 30 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

(*a*) तर्कसंग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ

Foll. 1*a*—7*b*.

By Annambhaṭṭa. Same work as that described under No. 4154 of the D.C S. MSS., Vol. VIII.

This MS. is said to have been transcribed by Susvaram Vēṅkaṭarāma Śāstri, the copying having been begun on the 8th day of the dark fortnight of the Śrāvaṇa month and completed on Saturday, the second day of the bright fortnight of the Bhādrapada month in the year Bhava

Complete.

(*b*) तर्कसंग्रहव्याख्या—न्यायबोधिनी.

TARKASAṄGRAHAVYĀKHYĀ: NYĀYABŌDHINĪ.

Foll. 8*a*—13*b*.

By Gōvardhanasudhī. Same work as that described under No. 4179 of the D.C.S. MSS., Vol. VIII.

Complete.

Fol. 14 is left blank.

(c) कारिकावली.

KĀRIKĀVALĪ.

Foll. 15*a*—17*b*.

By Viśvanāthapañcānana. Same work as that described under No. 3928 of the D.C.S. MSS , Vol. VIII.

Complete.

Fol. 18 is left blank.

(d) मुक्तावली—दिनकरीयसहिता.

MUKTĀVALĪ WITH DINAKARĪYA.

Foll. 19*a*—68*b*.

The text is by Viśvanāthapañcānana and the commentary by Mahādēva.

Same work as that described under No. 3939 with the same commentary as that described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Contains the Pratyakṣa-khaṇḍa incomplete, the Anumāna- and the Śabda- khaṇḍa complete.

Foll. 69 and 70 are left blank.

(e) महाभाष्यप्रदीपव्याख्या—उद्योतः.

MAHĀBHĀṢYAPRADĪPAVYĀKHYĀ : UDYŌTAḤ.

Foll. 71*a*—85*b*.

By Nāgōjibhaṭṭa. Same work as that described under No. 1309 of the D.C.S. MSS., Vol. III.

Contains the first Āhnika in the first Pāda of the first Adhyāya.

R. No **904**.

Paper. 8⅛ × 6½ inches. Foll. 32. Lines, 26 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

(*a*) सुब्रह्मण्यकवचः.

SUBRAHMAṆYAKAVACAḤ.

Fol. 1.

Similar to the work described under No. 7618 of the D.C.S. MSS., Vol. XIV.

Complete.

Fol. 2 is left blank.

(*b*) देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Foll. 3*a*—32*b*. Fol. 20*b* is left blank.

Same work as that described under No. 2444 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

The transcription of this MS work is said to have been completed by Sūryanārāyaṇa, son of Jōsya Haviryāji Rāma, on Wednesday, the 8th day of the dark fortnight of the Bhādrapada month in the year Yuva.

R. No. **905**.

Palm-leaf. 17⅝ × 1⅝ inches. Foll. 156. Lines, 8 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

(*a*) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 1*a*—7*a*.

By Śaṅkarācārya. Same work as that described under No. 310 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*b*) तलवकारोपनिषद्भाष्यम्.

TALAVAKĀRŌPANIṢADBHĀṢYAM.

Foll. 7*a*—16*b*.

By Śaṅkarācārya. Same work as the Kēnōpaniṣadbhāṣyam, which is described under No. 387 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) काठकोपनिषद्भाष्यम्.

KĀṬHAKŌPANIṢADBHĀṢYAM.

Foll. 17*a*—37*b*.

By Śaṅkarācārya. The work is also called Kaṭhavallyupaniṣadbhāṣyam, by which name it is described under No. 342 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) प्रश्नोपनिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Foll. 38*a*—53*a*. Fol. 53*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 618 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*e*) मुण्डकोपनिषद्भाष्यम्.

MUṆḌAKŌPANIṢADBHĀṢYAM.

Foll. 54*a*—70*b*.

By Śaṅkarācārya. Same work as that described under No. 719 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*f*) माण्डूक्योपनिषद्भाष्यम्.

MĀṆḌŪKYŌPANIṢADBHĀṢYAM.

Foll. 71*a*—110*b*.

By Śaṅkarācārya. Same work as that described under No. 704 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*g*) तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Foll. 111*a*—143*a*. Fol. 143*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 505 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*h*) ऐतरेयोपनिषद्भाष्यम्.

AITARĒYŌPANIṢADBHĀṢYAM.

Foll. 144*a*—156*b*.

By Śaṅkarācārya. Same work as that described under No. 330 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **906.**

Palm-leaf. $18\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 249. Lines, 8 in a page. Grantha. Good.

Purchased in 1913-14 from M.R.Ry. Rāmasvāmi Śāstrigaḷ of Anaṅganallūr in the Chittoor district.

Foll. 1 to 4 are left blank.

काशीखण्डः (स्कान्द).

KĀŚĪKHAṆḌAḤ (SKĀNDA).

Foll. 5*a*—243*a*.

The remaining foll. are left blank.

Same work as that described under No. 2291 of the D.C.S. MSS., Vol. IV, Part I.

Contains Adhyāyas 1 to 50 in the Pūrvakāṇḍa.

This manuscript is said to have been copied by one Appu of Elavambāḍi village.

R. No. 907.

Palm-leaf. 19½ × 1½ inches. Foll. 227. Lines, 8 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. Rāmasvāmi Śāstrigaḷ of Anaṅganallūr in the Chittoor district.

काशिखण्डः (स्कान्द).

KĀŚĪKHAṆḌAḤ (SKĀNDA).

Foll. 1*a*—227*a*. Fol. 227*b* is left blank.

Same work as that described under No. 2291 of the D.C.S. MSS., Vol. IV, Part I.

Contains Adhyāyas 51 to 100 complete.

R. No. 908.

Palm-leaf. 17⅝ × 1⅜ inches. Foll. 139. Lines, 7 in a page. Grantha. Fair.

Purchased in 1913–14 from M.R.Ry. Rāmasvāmi Śāstrigaḷ of Anaṅganallūr in the Chittoor district.

The first seven leaves are left blank.

(*a*) वृद्धाचलमाहात्म्यम्.

VṚDDHĀCALAMĀHĀTMYAM.

Foll. 8*a*—66*b*. Foll. 52*b* and 56*b* are left blank and fol. 48 is a duplicate of fol. 9.

A work treating about the sanctity and religious importance of the Śaiva shrine and of the river Maṇimuktā flowing by its side at Vṛddhācalam in the South Arcot district.

As found in the Adhyāyas 22 to 38 of the Brahmakaivartaka-purāṇa.

Beginning:

प्रसादये वारणराजवक्त्रं गोक्षिरशुभ्रं शशिखण्डचूडम् ।
विनायकं विघ्नमहं प्रणम्य विघ्नच्छिदं हैमवतीतनूजम् ॥

देवशर्मा—

उक्तं समस्तं भवता महात्मन् माहात्म्यमेतद्धि कवेरजायाः ।
वृद्धाचलस्यापि मुने प्रभावं वक्तुं त्वमर्हस्यखिलं च मह्यम् ॥

उक्तो नरेन्द्रेण सुमन्तुरित्थं मुनिः प्रसन्नः करुणार्द्रचेताः ।
तं देववर्माणमुवाच साधु पृष्टस्त्वया धर्मकथाप्रसङ्गः ॥

* * * *

इति ब्रह्मकैवर्तकाख्ये महापुराणे तीर्थप्रशंसायां वृद्धगिरिमाहात्म्ये द्वाविंशोऽध्यायः प्रथमः ॥

End:

त्वमपि (च) नृप गच्छ श्रेयसे ते यदिच्छा
चिरगिरिमथ नद्यां स्नाहि तावर्चयेशौ ।
प्रवितरत विविक्तं शाम्भवे चानुभक्त्या
परमममृततर्क्यं यास्यसीशास्पदं तत् ॥

Colophon:

इति श्रीब्रह्मकैवर्तकाख्ये महापुराणे तीर्थप्रशंसायां वृद्धगिरिमाहात्म्ये गौरीशसंवादे अनवद्यनाथप्रश्ने कलिङ्गम(मु)क्तिर्नामाष्टत्रिंशोऽध्यायः सप्तदशः ॥

(*b*) वृद्धाचलमाहात्म्यम्.

VṚDDHĀCALAMĀHĀTMYAM.

Foll. 67*a*—82*b*.

Similar to the above.

Complete in thirteen Adhyāyas; as found in the Skāndapurāṇa.

Beginning:

ऋषय ऊचुः—

श्रीमतो देवदेवस्य वृद्धाचलपतेर्विभोः ।
वैभवं नः समाचक्ष्व सूत त्वं वेत्सि सर्ववित् ॥

सूतः—

संशृणुध्वं मुनिश्रेष्ठाः सर्वलोकैकपावनीम् ।
तां कथां कथयाम्यद्य कृष्णद्वैपायनाच्छ्रुताम् ॥

* * * *

Colophon:

इति श्रीशैवपुराणे रौद्रसंहितायां तीर्थप्रकरणे वृद्धगिरिमाहात्म्ये प्रथमोऽध्यायः ॥

End:

इत्थमुक्तं मया विप्राः शिवरामानुवर्णनम् ।
सद्यः पापहरं नृणां श्रोतृणां शिवकीर्तनम् ॥

Colophon:

इति श्रीस्कान्दे पुराणे वृद्धगिरिमाहात्म्ये त्रयोदशाध्यायः ॥

(*c*) सुब्रह्मण्यमाहात्म्यम्.

SUBRAHMAṆYAMĀHĀTMYAM.

Foll 83*a*—95*a*.

Same work as that described under No. 2584 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

(*d*) कल्हारगिरिमाहात्म्यम्.

KALHĀRAGIRIMĀHĀTMYAM.

Foll. 95*a*—117*a*. Fol. 117*b* is left blank.

This work deals with the holiness of a place named Kalhāragiri, now known as Tiruttaṇi in the Chittoor district.

This manuscript is said to have been transcribed by Mārgasahāya Śāstrin of Anaṅganallūr, the copying having been completed on Friday, the 5th day of the bright fortnight of the Āśvija month, when the moon was in the constellation Mūla, in the year Vijaya.

Complete; as found in the Brahmāṇḍapurāṇa.

Beginning:

द्विरदवदनमाद्यं पुत्रमद्रीन्द्रपुत्र्याः
प्रशमितदुरितौघं स्वाश्रितानां सुरद्रुम् ।
हरिहरविधिपूर्वैरर्चितं प्रक्रियादौ
निहतसकलविघ्नं विघ्नराजं नमामि ॥

ऋषयः—

ऋषयो नैमिशारण्ये सूतं सर्वार्थकोविदम् ।
व्यासप्रसादसंपन्नमूचुः सर्वे समाहिताः ॥

* * * *

काञ्चीपुरीति विख्यातं क्षेत्रं सत्यव्रतं स्मृतम् ।
यत्र देवो महादेव एकाम्रनिलयः शिवः ।
भक्तिमुक्तिप्रदो नृणां कामाक्ष्या सह मोदते ।
तस्या उत्तरदिग्भागे श्रीपूर्णनगरी शुभा ॥
वीरेश्वरस्य वसतिर्विख्याता पृथिवीतले ।
पश्चिमे तत्समीपेऽस्ति किंचित्कल्हारभूधरः ॥

* * * *

तत्राहं धैर्यमास्थाय गत्वा तं क्षणिकाचलम् ।
तस्योपरिष्टात्प्राग्भागे मध्ये शैलमनोहरे ।
ब्रह्मतीर्थमिति ख्यातं सरश्च कृतवानहम् ॥

End:

शृणोति यो नरो भक्त्या माहात्म्यमिदमुत्तमम् ।
सर्वान् कामानिह प्राप्य स्कन्दलोकं प्रयाति सः ॥
यः श्रावयति माहात्म्यं मानवानां नरोत्तमः ।
स सर्वपापनिर्मुक्तः कौमारं पदमाप्नुयात् ॥
शृण्वन् पठन् श्रावयंश्च माहात्म्यमिदमुत्तमम् ।
यं यं कामयते मर्त्यस्तांस्तान्कामानवाप्नुयात् ॥

Colophon:

इत्यादिमहापुराणे ब्रह्माण्डे ब्रह्मनारदसंवादे कल्हारगिरिमाहात्म्ये दशमोऽध्यायः ॥

(e) गरलपुरीमाहात्म्यम्.

GARALAPURĪMĀHĀTMYAM.

Foll. 118*a*—139*b*.

Same work as that described under No. 2411 of the D.C.S. MSS., Vol. IV, Part II.

Complete in twelve Adhyāyas.

R. No. **909.**

Palm-leaf. 17½ × 1¼ inches. Foll. 118. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1913-14 from M.R.Ry. Rāmasvāmi Śāstrigal of Anaṅganallūr in the Chittoor district.

The first three leaves are left blank.

काञ्चीमाहात्म्यम्.

KĀÑCĪMĀHĀTMYAM.

Foll. 4*a*—114*a*.

Same work as that described under No. 2381 of the D.C.S. MSS., Vol. IV, Part II.

Breaks off in the thirty-seventh Adhyāya.

Fol. 114*b* is left blank. Fol. 115 contains a few stanzas of Drōṇaparvan in the Mahābhārata. Foll. 116 to 118 are left blank.

R. No. **910.**

Palm-leaf. 18⅛ × 1⅛ inches. Foll. 39. Lines, 8 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Rāmasvāmi Śāstrigal of Anaṅganallūr.

(*a*) सीतापरिणयः.

SĪTĀPARIṆAYAḤ.

Foll. 1*a*—14*a*. Fol. 14*b* is left blank.

A poem commemorating the marriage of Rāma with Sītā: by Sūryanārāyaṇādhvarin.

Breaks off in the fifty-first stanza of the fourth Sarga.

Beginning:

कृत्वा पणाय निजमौलिविधुं जितस्य द्यूतेऽद्रिजन्मनि तदाहृतिदत्तबाहौ ।
वीतोत्तरीयपृथुलस्तनवीक्षणेच्छोस्तत्कालमन्दहसितानि पुनन्तु शम्भोः ॥

वन्दारुबृन्दारकमौलिबृन्दमन्दारसंदोहमरन्दपूरैः ।
वन्देऽभिषिक्ताङ्घ्रिचरविन्दयुग्मं द्वैमातुरं दीनदयानदीनम् ॥

* * * *

आसीदयोध्येति पुरी धरित्र्यां संपल्लतोद्यानवनी रमायाः ।
नर्मोपकार्या नलिनासनस्य निर्माणनैपुण्यविशेषसीमा ॥

End:

इत्युक्तेऽथ समन्त्रमन्त्रिवचने संतुष्टचेता मही-
सारे सावरोधसि क्षितिपतिस्तं प्रार्थयित्वा मुनिम् ।
तस्यानुग्रहतो ग्रहर्क्षमहिते लग्ने शुभंयौ तिथौ
सोऽदीक्षीष्ट मखे त्रिविष्टपसदामत्यन्तसंतुष्टये ॥

Colophon:

इति सूर्यनारायणाध्वरिविरचिते सीतापरिणये महाकाव्ये तृतीयः सर्गः ॥

रावणेन पुरि(रिपु)घातिना तदा बाधिताश्चिरमनेकधा बुधाः ।
दीनदैन्यहरणाय दीक्षितं दैत्यविद्विषमहि(भि)प्रतस्थिरे ॥

* * * *

योगभाग्जनमनोऽणुमध्यभूनित्यवासकलनानुमापकम् ।
सूक्ष्मरूपमवहद्रमापतिः द्दष्टलग्नमवलग्नसीमनि ॥ ५० ॥
बिभ्रता[म]धिकटि हाटकद्युति श्रीधवेन सिचयं विडम्बिता ।
सान्ध्यराग . . . . ॥

(*b*) सीतापरिणयव्याख्या.
SĪTĀPARIṆAYAVYĀKHYĀ.

Foll. 15*a*—38*b*.

A commentary on the above-mentioned work: by Sūryanārāyaṇa, the same as the author of the text.

Breaks off in the thirty-second stanza of the second Sarga.

This manuscript is said to have been copied by one Subbarāyan.

Beginning:

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥

(निर्विघ्नमस्तु विघ्नेशकरुणालोकनान्मम ।)
सीतापरिणयग्रन्थव्याख्यानरचनाविधौ ॥
वाग्देवी मम जिह्वाग्रवर्तिनी भवतात्सदा ।
यत्कृपार्द्रदृशा मूकोऽप्यतिशेते बृहस्पतिम् ॥
सीतापरिणयाख्यस्य व्याख्यामन्वयदर्शिनीम् ।
काव्यस्य कुरुते सूर्यनारायणसुधीः स्वयम् ॥
इहान्वयमुखाः श्लोका व्याख्यायन्ते यथामति ।
सङ्ख्यावन्तः समीक्ष्यैतदाद्रियन्ताममत्सराः ॥
काणः काणादतन्त्रे फणभृदधिपतेर्वाचि मूकश्च खञ्जो
जैमिन्यध्वप्रचारे शुकजनकवचःसुन्दरीदर्शनेऽन्धः ।
साहित्यश्रीविहारानुचितवसतिरप्यब्ज(यो)न्यङ्गनोद्य-
त्कारुण्यापाङ्गयोगात्स जयति विदुषामेष शिष्याश्चिराय ॥

त्रिभुवनविभुः साक्षाद्रामः कथाश्रयनायकः
स जयति रसः शृङ्गारोऽन्यैः प्रधान इहाङ्गवान्।
रुचिरगणरीत्योजोवृत्तिप्रसादसुशब्दता-
ध्वनिलसदलंकारोदाराकृतिः प्रथतांतराम् ॥

तत्रभवता सूर्यनारायणाध्वरिणा स्वकृतस्य सीतापरिणयाख्यस्य काव्यस्य बालानां सुखबोधाय विदुषामनुग्रहात् यथामति किंचिदिदं व्याख्यायते। आद्यश्लोके पार्वतीपरमेश्वरयोर्द्यूतक्रीडां प्रसञ्जयति—कृत्वेति। 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि च॥ आदौ प्रयुञ्ज्याच्छ्रीशब्दमव्ययं वेष्टसिद्धये' इति अव्ययशब्दप्रयोगात् वर्णगणादिशुद्धिरुक्ता। अत एव 'निपीय यस्य क्षितिरक्षिणः कथाः' इति श्रीहर्षः, 'श्रियः पतिः श्रीमति' इति माघः, 'क्व सूर्यप्रभवो वंशः' इति कालिदासः। द्यूते अक्षक्रीडायां निजमौलिविधुं स्वशिरश्चन्द्रम्, अनर्घभूषणमित्यर्थः। पणाय कृत्वा द्यूतपणत्वेन निर्दिश्य।

* * * *

अथ सर्गसमापनमाह—इतीति। इतिशब्दः परिसमाप्तौ। 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः। सूर्यनारायणाध्वरिविरचिते तेन कृते सीतापरिणयाख्ये महाकाव्ये कवेरिदं काव्यम्; तस्येदमित्यण्। महच्छब्दोऽष्टादशवर्णनासूचकः। महाकाव्यलक्षणं प्राचीनैरभाणि—

'नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनम्।
उद्यानसलिलक्रीडामधुपानरतोत्सवाः॥
विप्रलम्भो विवाहश्च कुमारोदयवर्णनम्।
मन्त्रदूतप्रयाणाजिनायकाभ्युदया अपि।
एतानि यत्र वर्ण्यन्ते तन्महाकाव्यमिष्यते॥'

इति। प्रथमः सर्गः समाप्तः। एवमुत्तरत्र द्वितीयतृतीयादिसंख्या द्रष्टव्या॥ 'सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु' इत्यमरः॥

Colophon:

इति सीतापरिणयव्याख्याने प्रथमः सर्गः॥

अथास्मिन् सर्गे मृगयाविहारं वर्णयति—अथेति। अथ अनन्तरं जातुचित् कदाचित् आनताः प्रणताः अरयः शत्रवो यस्य तेन; पादाक्रान्तशत्रुणेत्यर्थः।

End:

युगपदेव अपतन्। अत्र शराणां वराहाणां च सहपातकथनात् सहोक्तिरलंकारः। तेन राज्ञः शरसन्धानचातुर्यं तादृशमिति व्यज्यते॥

वनसेवनसेच्छमन्यतः।

Fol. 39 contains one stanza taken from the Rāghavayādavīya.

R. No. 911.

Palm-leaf. 16¼ × 1⅝ inches. Foll. 67. Lines, 6 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Kumārasvāmi Śāstri of Pedakallepalli, Kistna district.

(*a*) आपस्तम्बशुल्बसूत्रम्—शुल्बप्रदीपसहितम्.

ĀPASTAMBAŚULBASŪTRAM WITH ŚULBAPRADĪPA.

Foll. 1*a*—54*a*. Fol. 54*b* is left blank.

Same work as that described under No. 1058 of the D.C.S. MSS, Vol. II, with the addition of a commentary called Śulbapradīpa or Sundararājīya of Sundara, who was the son of Mādhavācārya of Kuśika-gōtra.

Contains Paṭalas one to six complete.

Beginning:

आपस्तम्बेन योऽयं व्यरचि भगवता शुल्बसंज्ञो गभीरः
प्रश्नार्थं तस्य भाष्यप्रभृतिषु कथितं विस्तृतं वीक्ष्य कृत्स्नम्।

संक्षेपाद्बोधनार्थं कुशिककुलनिधेर्माधवाचार्ययज्वः
पुत्रः शुल्बप्रदीपं विवरणमधुना सुन्दरो निर्मिमीते ॥

विहारयोगान् व्याख्यास्यामः ॥

विहारो विहरणं चतुरश्रादिरूपेण भूमेः करणम् । तस्य योगा उपायाः ॥

यावदायामं प्रमाणं तद (. .) विवृद्धिर्वा ॥

अभीष्टक्षेत्रायामसंमिता रज्जुः प्रमाणम् । सा सर्वमानेषूभयतःपाशा प्राचीना पूर्वापरयोः शङ्कोर्विहिता भवति । सैव पृष्ठे भवत्वात् पृष्ठ्येति व्यपदिश्यते ।

End:

क्लृप्तं चैतद्बोधायनेन । अश्वमेधः प्राप्यश्चेदाहरेदत ऊर्ध्वं विधाम. भ्यसेन्नेतरदाद्रियेत आदितश्चेदाहरेताहृत्य कृतां तावत्प्रत्याददीतेति ॥

Colophon:

इति सुन्दरराजीये षष्ठः पटलः ॥

विपर्यस्य कृता एता द्वात्रिंशत्षोडशीरिह ।
साहस्रे च द्विसाहस्रे पञ्चषष्टिं विदुर्बुधाः ॥

* * * *

अभिधानाख्यवर्णस्य प्रथमस्य परे यदि ।
मूर्ध्नि प्रथमसद्भावे द्वित्वं न स्यात्सदोष्मणाम् ॥

The owner of the MS.—

वर्धमानान्वयाब्धीन्दोर्वेङ्कटेश्वरयज्वनः ।
पुत्रः शंकरयज्वाभूत् तस्येदं पुस्तकं महत ॥

Fol. 55 gives an index of the contents of the Āpastambaśrauta-sūtra.

(*b*) अङ्गुलादिमाननिर्णयः—सव्याख्यः.

ANGULĀDIMĀNANIRṆAYAḤ WITH COMMENTARY.

Foll. 55*a*—63*b*. Fol. 61*b* is left blank.

Deals with a kind of measurement having an 'Aṅgula' as its standard, used in connection with the construction of sacrificial altars.

Incomplete

Beginning :

मानं मानान्तरं मात्रा मुष्टिर्वै देहलब्धकम् ।
अङ्गुलं पञ्चधा प्रोक्तमागमार्थविशारदैः ॥

मानमिति। मानं मानाङ्गुलं मानान्तरं मानान्तराङ्गुलं मात्रा मात्राङ्गुलं मुष्टिर्मुष्टयङ्गुलं देहलब्धकं देहलब्धाङ्गुलं चेति पञ्चधाङ्गुलमागमार्थविशारदैः प्रोक्तमिति व्याख्या ॥

End :

त्रयोदशाङ्गुलं दशतिलोनमेकं षड्विंशकं तिलद्वयोनमपरं तद्धनुरिव तक्षेत् । यथाङ्गुलिः सप्तविंशतितिलाश्च करो भवति । उदाहरणम्—पार्श्वमानी

* * * *

मूलमक्षणयारजः २५, ३१ एतदर्धं ११, ३३. वर्गः १६. व्यासार्धम्.

(*c*) लीलावती.

LĪLĀVATĪ.

Foll. 64*a*—67*b*

By Bhāskarācārya. Same work as that described under R.No 663(*e*) *ante*.

Wants beginning and end

R. No. **912.**

Palm-leaf. 15¾ × 1½ inches. Foll. 136. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry Kumārasvāmi Śāstri of Pedakallepalli in the Kistna district.

(a) गोपालरत्नाकरः—आन्ध्रटीकासहितः.

GŌPĀLARATNĀKARAḤ WITH TELUGU MEANING.

Foll 1*a*—23*a*. Fol. 23*b* is left blank.

Incomplete.

A treatise on horoscopy in astrology: by Gōpāla, son of Varalakṣmī and Nāgēśa and disciple of Jagannāthārya who was the son of Rāghavārya.

Beginning:

श्रीमद्विष्णुपदारविन्दयुगलं ध्यायेत्सदा हृद्गते(तं)
संसारार्णवतारणैकतरुणी(रणिं)पापान्धकारु(रे)रविम् ।
तन्नामा(म्नां)वरमूलमन्त्रजपितं मालां च बद्ध्वा गुलैः(गले)
ज्योतिःशास्त्रवरै(ः)प्रभाति कथितं(तो)गोपालरत्नाकरं(रः) ॥

* * * *

श्रीमत्कौशिकराघवार्यतनयं शिष्यालिकल्पद्रु(मं)
बौद्धाहार्यमदप्रहारकुलिशं जैनेभकण्ठीरवम् ।
शौर्याचद्वमदुग्धदाह(श्चन्मदभट्टदाव) दहनं पाषण्डमेघानिलं
मायावादितमोदिवाकरजगन्नाथार्यपादाम्बुजम् (दं भजे) ॥

वासः कारकवालसासमभ्यसेन्नागेशगाग्र स्वयं (?)
नामाख्यातयुधिष्ठिरस्य कथितं विख्येप(ख्यात)वंशोद्भवम् (?)।
तत्पत्नी वरलक्ष्मिनाम उदितं तत्पुत्रगोपालकं
श्रीरामाङ्घ्रियुगे समर्पणकरणे गोपालरत्नाकरम् ॥

सौम्यस्वामियुतेक्षितैश्शुभकरं तद्भावसौख्यप्रदं
षष्ठद्वादशरन्ध्रनाथसहिते क्रूरे च षष्ठा भवेत् ।
नीचारी रिपुरन्ध्ररिप्फसदने ग(योऽ)स्तं गतो वा यदि
दौर्बल्ये खगसौख्यमित्रस्वगृहे खेटन्ति लं युक्तवाक् ॥

End:

> रोहिण्याश्च गते चन्द्रे यदि शुक्रेण पश्यति ।
> करोति भूपती(तेः) तुल्यं क्रूरे षष्ठत्रिलाभगे ॥

(*b*) ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Foll. 24*a*—34*a*. Foll. 34*b*—37*b* are left blank.

Similar to the above.

Incomplete.

Beginning:

> आश्विज्यमाग्नेयमथादितेयं सार्पं च सावित्रमथानिलं च ।
> मूलोत्तराषाढमजैकपादं पौष्णं सदाश्विक्रमतोऽभिपश्येत् ॥ (?)
>
> * * * *
>
> मेषादिभिः पञ्चदशैव पश्येदेतानि सव्यानि च कालचक्रे ॥
> ब्राह्मी मखा विशाखा च श्रोणा सोमार्द्रकार्यमा ।
> उत्तरा मैत्र ज्येष्ठा च श्रविष्ठाशततारका ॥
> अपसव्या(नि चैता)नि द्वादशेति विदुर्बुधाः ॥

End:

> रोगनाशं महासौख्यं महाधनजलाभतः ।
> हृद्रोगं सुमतित्वं च भौमे मन्ददशां गते ॥

(*c*) सर्वार्थचिन्तामणिः.

SARVĀRTHACINTĀMAṆIḤ.

Foll. 38*a*—123*b*.

Similar to the above. By Vēṅkaṭēśa, son of Appayārya.

Adhyāyas one to sixteen.

Beginning:

श्रीमच्छेषगिरेस्तदा(टा)दिनिलये श्रीवेङ्कटेशं गुरुं
नत्वा वेङ्कटनायकं त्वनुदिनं जातोऽप्पर्यायात्सुधीः ।
ज्योतिःशास्त्रमहाब्धिपारगमने वक्ष्यामि पोतात्मकं
ज्योतिःशास्त्रविवेकपाकविदुषां सर्वार्थचिन्तामणिम् ॥

अथ गणनाथनमस्कारः—

नीलाम्बुजरुचिं देवं सकृद्यान्ति मनोरथम् ।
देवाः प्रणम्य यं सर्वे तं नमामि गजाननम् ॥

* * * *

मेषादिराशयः सर्वे दिनेशप्रमुखा ग्रहाः ।
ये च लोकोपकर्तारः पान्तु मामिह ते सदा ॥
यज्जातके निगदितं भुवि मानवानां
तत्प्राश्निकेऽपि सकलं कथयन्ति तज्ज्ञाः ।
प्रश्नेऽपि जन्मसदृशो भवति प्रभेदः
प्रश्नस्य चात्र जननस्य न कश्चिदस्ति ॥

* * * *

संज्ञाध्याये वर्णिताः सर्वशास्त्रात्सारं बुद्ध्वा सर्वलोकोपकारः(म्) ।
यद्यत्सर्वं वेङ्कटेशेन बुद्ध्या तत्तत्पादे योजयेत्तत्फलानि ॥

Colophon:

इति संज्ञाध्याये सर्वार्थचिन्तामणौ प्रथमोऽध्यायः ॥
लग्नेश[या]धर्माधिपशुक्रयोगात् केन्द्रत्रिकोणेषु यथा गुरुः स्यात्
तदा विवाहोऽत्र बलिष्ठराशौ ज्ञात्वा त्रिकालं भगणं प्रयुञ्ज्यात् ॥

End:

विद्यावादं कृषेर्नाशं कार्यहानिपदभ्रमम् ।
वह्निचोरादिभीतिं च लभते नात्र संशयः॥

इति शुक्रदशान्तर्दशाफलम् ।

Colophon:

इति सर्वार्थचिन्तामणौ दशान्तर्दशाफलकथनं नाम षोडशोऽध्यायः ॥

(*d*) महादशाफलम्.

MAHĀDAŚĀPHALAM.

Foll. 123*b*—132*b*. Fol. 123*a* is left blank.

A work on astrology dealing specially with the various kinds of planetory influences, good or bad, in the life time of a person.

Complete.

Beginning:

दशाप्रवेशचन्द्रचिन्ता । गार्गिः—

यद्राशिसंस्थः शीतांशुः शुभकृत्परिकीर्तितः ।
स राशिस्तस्मिन्कालेषु(तु) योभावस्तत्कृतं भवेत् ॥

शरीरादिकृतं सौख्यं वक्तव्यं बलयोगतः ।
अनुक्तराशिसंस्थस्तु तद्भावानामशोभनः ॥

End:

शुक्रः—

स्त्रीपुत्रधान्यनवरत्नधनानि वस्त्रं
राजप्रियं सहजबान्धवशोभनं च ।
विद्वज्जनोल्लसितबुद्धिविशारदत्वं
शुक्रो दशा भवति निश्चितराज्यलक्ष्मीः ॥

रोगनाशं पितुः सौख्यं मुक्तालाभं प्रियं सुखम् ।
विवाहं भूमिलाभं च देवब्राह्मणपूजनम् ॥

वाहनं बहुसंपत्तिश्चित्रे च परवैभवम् ।
राजपूज्यो भवेन्नित्यं शुक्रस्यादिदशाफलम् ॥

Colophon:

इति महादशाफलम् ॥

(*e*) प्रभवादिवर्षमासवारजातफलम्.

PRABHAVĀDIVARṢAMĀSAVĀRAJĀTAPHALAM.

Foll. 133*b*—136*a*. Fol. 136*b* is left blank.

Describes the characteristics of persons born in any of the sixty cyclic years in any of the twelve months and in any of the seven days of a week.

Incomplete.

Beginning:

उद्योगी बलवान् . . . . . . प्रभवे जायते नरः ॥

श्रीमान् मनोहरोग(राङ्ग)श्च विशालाक्षो नृपप्रियः ।
कामी सर्वकलाभिज्ञो विभवाब्दे समुद्भवः ॥
गीतनृत्तप्रियश्चैव भोगी गुणसमन्वितः ।
मृष्टान्नपानसन्तुष्टः शुक्रवर्षे समुद्भवः ॥
दुर्मन्त्री निरहङ्कारी दु . . . गुणान्वितः ।
परदाररतो नित्यं प्रमोदूतसमुद्भवः ॥

End:

क्षुद्रामक्रोधगात्रश्च दीनवृत्तिस्तिलप्रियः ।
बहुव्ययकरो नित्यं क्षयसंवत्सरोद्भवः ॥

मासफलानि—

वेदशास्त्रार्थकुशलस्सदाचाररतस्सदा ।
नित्योत्सवरतश्श्रीमान् चैत्रमासे समुद्भवः ॥
. . . . . जातो विद्वांश्च धनेश्वरः ।
स्वानुरक्तश्च शास्त्रार्थकोविदः शुभगस्तथा ॥

R. No. **913.**

Palm-leaf. 19¾ × 1⅝ inches. Foll. 59. Lines, 10 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. Kumārasvāmi Śāstri of Pedakallepalli in the Kistna district.

(*a*) ग्रहलाघवम्—सविवरणम्.

GRAHALĀGHAVAM WITH COMMENTARY.

Foll. 1*a* – 51*b*

Same text as that described under R. No. 199 *ante*, but with commentary. The author of the text is Gaṇēśa, son of Kēśava. The author of the commentary is Viśvanātha, son of Divākara and a resident of Gōlagrāma. It is stated apparently by the commentator, who may be a disciple of Gaṇēśa, that Nṛsiṁha, the brother's son of Gaṇēśa, wrote a commentary on the Grahalāghava, and that therein he gives two stanzas mentioning the several original works as well as the commentaries written by his uncle. These stanzas also are given in the following extract.

Beginning:

ज्योतिःप्रबोधजननी परिशोध्य चित्तं
तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायै-
र्व्यक्तीकृता जयति केशववाक्छ्रुतिश्च ॥

ज्योतिर्विद्गुरुणा गणेशगुरुणा निर्मन्थ्य शास्त्राम्बुधिं
यच्चक्रे ग्रहलाघवं विवरणं कुर्वेऽस्य सत्प्रीतये ।
स्मृत्वा शम्भुसुतं दिवाकरसुतः श्रीविश्वनाथः कृती
जाग्रज्ज्योतिरहर्गणाकुलपरित्राणाय नारायणः ॥

श्रीमन्मद्गुरुणा गणेशदैवज्ञेन ये (ग्रन्थाः) कृतास्ते तद्भ्रातृपुत्रेण नृसिंहज्योतिर्विदा स्वकृतग्रहलाघवटीकायां श्लोकद्वयेन निबद्धाः । तद्यथा—

कृत्वादौ ग्रहलाघवं लघुबृहत्तिथ्यादिचिन्तामणिं
सत्सिद्धान्तशिरोमणेश्च विवृतिं लीलावतीव्याकृतिम् ।

श्रीबृन्दावनदीपिकां च विवृतिं मौहूर्ततत्त्वस्य वै
सच्छ्राद्धादिविनिर्णयं सुविवृतिं वृद्धार्णवाख्यस्य वै ॥
सुधीरञ्जनं तर्जनीयन्त्रकं च
सुकृष्णाष्टमीनिर्णयं होलिकायाः ।
लघूपायपोतं तथान्यानपूर्वान्
गणेशो गुरुर्ब्रह्मनिर्वाणमाप ॥

श्रीमत्कौशिकमुनिश्रेष्ठवंशोद्भवः जलनिधितीरनिकटवर्ती नन्दिग्राम-निवासी सकलभूमण्डलजनपूजितचरणयुगलाम्भोरुहः निखिलशास्त्रार्थप्रवीणः अष्टादशसिद्धान्तोपपत्तिकोविदः समस्तवैयाकरणाग्रणीः अगणितगणित-शास्त्रविचारसारचतुरः ज्योतिर्वित्कुलावतंसः श्रीमत्केशवदैवज्ञात्मजः श्री-मद्गणेशदैवज्ञाख्यः ग्रहलाघवाख्यं करणं चिकीर्षुः तत्रादौ निर्विघ्नेन ग्रन्थसमाप्त्यर्थं तत्प्रचयार्थमाशीर्नमस्क्रियावस्तुनिर्देशात्मकानां मङ्गलानां मध्ये श्रुतिदेवतागुरुवाङ्निर्देशात्मकं मङ्गलं वसन्ततिलकया प्रतिबध्नाति-- ज्योतिरिति । सा, केशवः ग्रन्थकृत्तातः तस्य वाक् वाणी जयति सर्वोत्कर्षेण वर्तते । सा, श्रुतिः वेदोऽपि जयति । कीदृशीति श्लेषे-णाह--ज्योतिःप्रबोधजननी ज्योतिषां ग्रहनक्षत्रादीनां प्रबोधो ज्ञानं तज्जनयतीति सा । अन्यत्र ज्योतिषस्तेजसः परब्रह्माख्यस्य प्रबोधो ज्ञानं तज्जनयतीति सा ।

End :

अथ पूर्वाचार्याणां सगर्वत्वमात्मनः सविनयत्वमाह -

पूर्वे प्रौढतराः कचित् किमपि यच्चक्रुर्धनुर्ज्ये विना
ते तेनैव महातिगर्वकुभृदुच्छृङ्गेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघु कृतं हित्वा धनुर्ज्ये मया
तद्गर्वो मयि मास्तु किं न तदहं तच्छास्त्रता वृद्धधीः ॥

पूर्वे इति । पूर्वे भास्करादयः प्रौढतराः कचित् स्थले त्रिप्रश्नादौ किमपि ग्रहकर्मच्छायादि धनुर्ज्ये विना चक्रुः । ते तेनैव कारणेन महान् अतिगर्वलक्षणो यः कुभृत् पर्वतः तस्य उत् ऊर्ध्वे शृङ्गे अधिरोहन्ति । यतस्तैरुक्तम् — ' इति कृतं लघु कार्मुकशिञ्जिनीग्रहणकर्म विना द्युतिसाधनम् ।' इहास्मिन् ग्रन्थे मया अखिलं सर्वं मयोक्तं धनुर्ज्याविधिं हित्वा लघु सुकुमारं कृतम् । तत् तस्मात् तेषां गर्वो मयि किम् । मास्तु । अस्तु वः । यत् यस्मात् कारणादहं तच्छास्त्रतः तेषां भास्करादीनां शास्त्र मवलोक्य वृद्धधीः तच्छास्त्रं विलोक्य मम धीः विस्तृता । अतस्तद्गर्वो मयि नास्तीति ॥

अथालंकारश्लोकानाह—

नन्दिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत्कौशिकगोत्रजः सकलसच्छास्त्रार्थवित् केशवः ।
सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धावबोधांशकः
स्वच्छं वृत्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत् ॥

नन्दिग्राम इति । अपरान्तविषये अपरा पश्चिमदिक् तस्या अन्तः प्रान्तः तस्मिन् विषयः स्थानं यस्य सः तस्मिन् नन्दिग्रामे केशव आसीत् ।

* * * *

एतत् अकरोत् कृतवानित्यर्थः ॥

Colophon:

इति श्रीदैवज्ञवर्यदिवाकरदैवज्ञात्मजविश्वनाथविरचितपञ्चाङ्ग्यां चन्द्रग्रहणस्योदाहृतिः ॥

समाप्तोऽयं ग्रन्थः ॥

गोलग्रामनिवासिनो गुरुपदद्वन्द्वाब्जभक्तो रत-
स्यासीत् तत्र दिवाकरस्य तनयः श्रीविश्वनाथाह्वयः ।

तेनेदं ग्रहलाघवस्य गति(दि)तं स्पष्टीकृतं तद्बुधैः
शोध्यं शुद्धमिदं तदा तु गणकैः स्वान्तैः सदा धार्यते ॥

Foll. 52 and 53 contain a few lines regarding Grahagaṇita.

(b) प्रायश्चित्तानुक्रमणिका.

PRĀYAŚCITTĀNUKRAMAṆIKĀ.

Foll. 54a—59b.

On the manner of performing certain expiatory ceremonies.

Complete.

Beginning:

सर्वपापक्षयार्थाय प्रायश्चित्तं चिकीर्षताम् ।
कूश्माण्डगणहोमानां क्रियतेऽयमनुक्रमः ॥

अमावास्यायां पौर्णमास्यामापूर्यमाणपक्षस्य वा पुण्यनक्षत्रेऽहनि कृतप्राणायामः

* * * *

सर्वेषां पापानामपनोदनार्थं सर्वप्रायश्चित्तार्थं कूश्माण्डगणहोमं करिष्य इति संकल्प्य ।

End:

विवाहानन्तरं कुर्याद्वैश्वदेवं समाहित[ा]ः ।
यद्वा विभागकालेऽपि पितर्यपगतेऽपि वा ॥

R. No. **914.**

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 147. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913-14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

हरिवंशः.

HARIVAMŚAḤ.

Foll. 1a—141b. The remaining leaves are left blank.

Same work as that described under No. 1970 of the D.C S. MSS., Vol. IV, Part I.

Contains Adhyāyas 231—332 in the Uttarabhāga.

R. No. **915.**

Palm-leaf. 23¾ × 1⅝ inches. Foll. 98. Lines, 8 in a page. Telugu. Good.

Purchased in 1913–14 from M.R Ry. Jaganmōhana Rao of Masulipatam.

(*a*) शिवगीता.

ŚIVAGĪTĀ.

Foll. 1*a*—18*a*. Fol. 18*b* is left blank.

Same work as that described under No. 2546 of the D.C.S. MSS., Vol. IV, Part II.

This work is said to have been transcribed by Māmaḍi Veṅgayya, the copying having been completed on Sunday, the 4th day of the bright fortnight of Bhādrapada, in the year Parābhava.

Complete.

(*b*) ईश्वरगीता.

ĪŚVARAGĪTĀ.

Foll. 19*a*—29*b*.

Similar to the above.

Complete in twelve Adhyāyas ; as found in the Kūrmapurāṇa.

Beginning :

ऋषय ऊचुः—

भवता कथितः सर्गो मनोः स्वायंभुवस्य तु ।
ब्रह्माण्डस्यास्य विस्तारो मन्वन्तरविनिश्चयः ॥
तत्रेश्वरो महादेवो वर्णिभिर्धर्मतत्परैः ।
ज्ञानयोगरतैर्नित्यमाराध्यः कथितस्त्वया ॥
तद्वदेव हि संसारदुःखनाशनमुत्तमम् ।
ज्ञानं ब्रह्मैकविषयं येन पश्येम तद्वद ॥

त्वं हि नारायणात्साक्षात् कृष्णद्वैपायनात्स्वयम् ।
अवाप्ताखिलविज्ञानस्तत्त्वां पृच्छामहे वयम् ॥
श्रुत्वा मुनीनां तद्वाक्यं कृष्णद्वैपायनं प्रभुम् ।
सूतः पौराणिकः स्मृत्वा भाषितुं ह्युपचक्रमे ॥

* * * * *

प्रोवाच पृष्टो भगवान् मुनीनां परमेश्वरः ।
निरीक्ष्य पुण्डरीकाक्षं स्वात्मयोगमनुत्तमम् ॥
तच्छृणुध्वं यथान्यायमुच्यमानं ममानघाः ।
प्रशान्तमनघा(सः) सर्वे ज्ञानमीश्वरभाषितम् ॥

Colophon:

इति श्रीकूर्मपुराणे उपरिभागे ईश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीईश्वरनारायणमहर्षिसंवादे प्रथमोऽध्यायः ॥

End:

तद्वदाखिललोकानां रक्षकं कर्मसंग्रहम् ॥
यदुक्तं देवदेवेन विष्णुना कूर्मरूपिणा ।
श्रुत्वा मुनीनां तद्वाक्यं कृष्णद्वैपायनः प्रभुः ॥
मुनिना भाषितं कृत्स्नं प्रोवाच सुसमाहितः ।
य इदं पठते भक्त्या संवादं कृत्तिवाससः ॥
सनत्कुमारप्रमुखैः सर्वपापैः प्रमुच्यते ।
श्रावयेद्वा द्विजान् शुद्धान् ब्रह्मचर्यपरायणान् ॥
यो वा विचारयेदर्थं स याति परमां गतिम् ।
यश्चैतच्छृणुयान्नित्यं भक्तियुक्तो दृढव्रतः ॥
सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ।
तस्मात्सर्वप्रयत्नेन पठितव्यो मनीषिभिः ॥
श्रोतव्यश्च स मन्तव्यो निदिध्यास्योऽपि यत्नतः ।
कर्तव्यो विधिवाक्येन मुक्त्यर्थं ब्राह्मणैः सदा ॥

Colophon :

इति श्रीकूर्मपुराणे उपरिभागे ईश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे वैयासिक्यां संहितायां पारमहंस्यां योगशास्त्रे श्रीईश्वरनारायणमहर्षिसंवादे गीतापठनमाहात्म्ययोगो नाम द्वादशोऽध्यायः ॥

(*c*) ब्रह्मगीता.

BRAHMAGĪTĀ.

Foll. 30*a*—47*a*.

Same work as that described under No. 2481 of the D.C.S. MSS., Vol. IV, Part II.

Complete in twelve Adhyāyas ; as found in the Skāndapurāṇa.

Beginning :

मुनय ऊचुः—

भवता सर्वमाख्यातं संक्षेपाद्विस्तरादपि ।
इदानीं श्रोतुमिच्छामि ब्रह्मगीतामनुत्तमाम् ॥
सर्वविज्ञानरत्नानामाकरस्य माहात्मनः ।
कृष्णद्वैपायनस्यैव भवान् शिष्यः सुशिक्षितः ॥
त्वयैवाविदितं किंचिन्नास्ति सत्यं प्रभाषितम् ।
यदि प्रसन्नो भगवंस्तन्नो वक्तुमिहार्हसि ॥

सूतः—

वक्ष्ये तामादरेणैव ब्रह्मगीतामनुत्तमाम् ।
श्रद्धया सहिता यूयं शृणुत ब्रह्मवित्तमाः ॥
पुरा कल्पान्तरे देवाः सर्वे संभूय सादरम् ।
विचार्य सुचिरं कालं वेदानामर्थमुत्तमम् ॥
संशयाविष्टचित्तास्तु तपस्तप्त्वा सुदुश्चरम् ।
अभिजग्मुर्विधातारं द्रष्टुं देवा महर्षयः ॥

* * * *

ब्रह्मापि ब्रह्मविन्मुख्यैः सर्वदेवैरभिष्टुतः ।
प्राह गम्भीरया वाचा वेदानामर्थमुत्तमम् ॥

Colophon:

इति ब्रह्मगीतासूपनिषत्सु प्रथमोऽध्यायः ॥

End:

इति शिवपरभक्त्या प्राप्तविद्यस्तु सूतः
सुखतरशिवतत्त्वप्रापिकामेव गीताम् ।
मुनिगणहितबुद्ध्या प्राप्य निर्वाणरूपं
परतरमवलोक्य प्रज्ञया मौनमाप ॥
मुनयश्च गुरुं परवेदिनं प्रणिपत्य समस्तहितप्रदम् ।
हृदयस्थमहंपदलक्षितं परमतत्त्वतयैव विदुः स्थितम् ॥

Colophon:

इत्यादिमहापुराणे श्रीस्कान्दे सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे ब्रह्मगीतासूपनिषत्सु द्वादशोऽध्यायः ॥

(*d*) सूतगीता.

SŪTAGĪTĀ.

Foll. 47*b*—55*b*.

Same work as that described under No. 2585 of the D.C.S. MSS., Vol. IV, Part II.

Complete in eight Adhyāyas.

Fol. 56*a* contains Bhagavadgītānyāsadhyāna. Fol. 56*b* is left blank.

(*e*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 57*a*—69*a*.

Same work as that described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

The copying of this work is said to have been completed on the 2nd day of the bright fortnight of Bhādrapada in the year Ānanda.

The remaining leaves are left blank.

R. No. 916.

Palm-leaf. 18 × 1½ inches. Foll. 57. Lines, 8 in a page. Telugu. Very much injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

कमलाकरभट्टीयम्.

KAMALĀKARABHAṬṬĪYAM.

By Kamalākarabhaṭṭa. Same work as that described under No. 2742 of the D.C.S. MSS., Vol. V.

Contains up to the end of Śrāddhaprayōga.

R. No. 917.

Palm-leaf. 15¾ × 1½ inches. Foll. 113. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

The first four leaves are left blank.

कालामृतम्—उज्वलासहितम्.

KĀLĀMṚTAM WITH UJJVALĀ.

Foll. 5*a*—113*b*.

Same work as that described under R.No. 741 *ante*, but with the commentary named Ujjvalā by Vēṅkaṭayajvan of Kuṇḍinīpaṭṭana, whose father and mother were Vēṅkaṭa and Cennamāmbā and who had four brothers, Yallayajvan and three others.

Complete.

Beginning:

श्रीमच्चिन्तलपाटिवंशजलधेः शीतांशुना धीमता
ध्यात्वा विघ्ननिवारणाय हृदये श्रीदक्षिणस्यां(णास्यं)गुरुम् ।

टीका ज्यौतिषशास्त्रतत्त्वमखिलं संगृह्य संभाष्यते
श्रीमद्वेङ्कटयज्वना बुधमुदे कालामृतस्योज्ज्वला ॥

श्रीमच्चिन्तलपाटिवंशमहितः श्रीवेङ्कटाख्यो महान्
शान्तः शंकरकिंकरश्च सुषुवे श्रीचिन्नमाम्बा च यम् ।
यस्योदग्रतपोधनाः श्रुतिविदः श्रीयल्लयज्वादय-
श्चत्वारः सुसहोदराः शुचिधियः श्रीरुद्रसंजापकाः ॥

वेदं याजुषमङ्गसंगतमसौ योऽजीगणल्लीलया
मन्वादिष्वपि धर्मशास्त्रनिचयेष्वेकाधिपत्यं गतः ।
ज्योतिःशास्त्रसुधारसं कबलयन् श्रौतादिकेऽजागरीत्
सोऽयं वेङ्कटयज्वको विजयते श्रीकुण्डिनीपट्टणे ॥

कालामृतस्य यत्तत्त्वं नारिकेलफलोपमम् ।
विभज्य ते पिबन्त्वस्य सारं ज्यौतिषचुञ्चवः ॥

अथ तत्रभगवान् कविः स्वचिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय

*   *   *   *

मङ्गलमादावाचरंश्चिकीर्षितं प्रतिजानीते—

श्रीमद्वेङ्कटनायकं कुलगुरुं नत्वा सदाभीष्टदं
ज्योतिःशास्त्रपयोनिधिप्रमथनात्सारं समुत्कृष्य तम् ।
विद्वद्भिश्चमनोहरं मृदुपदं संक्षेपतः संस्फुटं
गर्भाधानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ॥

श्रीमदिति । आदौ श्रीशब्दप्रयोगात् वर्णगणादिशुद्धिरभ्युह्यः । तदुक्तम्—'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥' इति । कुलगुरुं गृहदैवतम् । इष्टदैवतमित्यर्थः ।

End:

बीजोप्तौ लग्नफलान्याह—

मेषे चेत्पशुनाशनं बहुफलं चेत्कर्कटे चेद्धटे
कुर्यात्प्राणहृतिं च सस्यहरणं लग्ने मृग सर्वदा ।
सिंहे चोरभयं घटे बहुभयं बीजोप्तिराद्या शुभा
कन्यागोझषयुग्मवृश्चिकधनुःष्वेतेषु धान्यप्रदा ॥

मेषेति । आद्या प्रथमा बीजोप्तिः बीजावापः मेषे मेषलग्ने चेत् पशुनाशनमनडुहां नाशनम् । कर्कटे चेत् कर्काटकलग्ने बहुफलमधिकलाभम् । घटे तुलायां प्राणहृतिं प्राणनाशनं च । मृगे लग्ने मकरलग्ने सर्वदा सस्यहरणं सस्यनाशनम् । सिंहे सिंहलग्ने चोरभयम । घटे कुम्भलग्ने बहुभयमधिकभीतिं कुर्यादिति सर्वत्र संबन्धः । कन्यागोझषयुग्मवृश्चिकधनुःषु कन्यावृषभमीनमिथुनवृश्चिकधनुःषु एतेषु लग्नेषु तु बीजोप्तिः शुभा शुभप्रदा धान्यप्रदा च स्यादिति शे(षः) ॥

R. No. 918.

Palm-leaf. 17 × 1½ inches. Foll. 208. Lines, 7 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) भोजप्रबन्धः.

BHŌJAPRABANDHAḤ.

Foll. 1*a*—43*b*

A work dealing with the life of the famous king named Bhōja who is said to have reigned in a place known as Dhārā. It is written in prose mingled with copious poetical quotations and stanzas by Ballāla.

Incomplete.

Beginning:

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

स्वस्ति श्रीमहाराजाधिराजस्य भोजराजस्य प्रबन्धः कथ्यते—आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत् । अस्य वृद्धत्वे भोज इति पुत्रः समजनि । स यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानन्तरं मुञ्जं महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास ।

End :

देव मां कन्यारत्नमवेहि । पुनराह—

इन्दुं कैरविणीव कोकपटलीवाम्भोजिनीवल्लभं
मेघं चातकमण्डलीव मधुपश्रेणीव पुष्पावलिम् ।
माकन्दं पिकसुन्दरीव रमणीवात्मेश्वरं प्रोषितं
(चेतो)वृत्तिरियं सदा नृपवर त्वां द्रष्टुमुत्कण्ठते ॥

Foll. 14—51 are left blank.

(*b*) कालामृतम्—उज्ज्वलासहितम्.

KĀLĀMṚTAM WITH UJJVALĀ.

Foll. 52*a*—161*a*. The remaining leaves are left blank.

Same work as that described under R.No. 917 *ante*.

Complete.

R. No. **919.**

Palm-leaf. 14¾ × 1¼ inches. Foll. 20. Lines, 7 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) लक्ष्मीसंवादः—आन्ध्रटीकासहितः.

LAKṢMĪSAṀVĀDAḤ WITH TELUGU MEANING.

Foll. 1*a*—6*b*.

Similar to the work described under No. 915 of the D.C.T. MSS. This commemorates a festival celebrated in Viṣṇu temples and particularly in the temple at Tirupati.

Complete.

Beginning :

संरक्तविश्वावसुनारदादिसंगीयमानाद्भुतगोपवेषः ।
प्राप्तोत्सवः केशव आगतोऽयं कोलाहलः कस्य तमित्युवाच ॥

* * * *

क्षीरार्णवे कनकरत्नमयाग्रभागे रत्नाद्रिनाम्नि सितपङ्कजधाम्नि भव्ये ।
तद्भृङ्गचुम्बितनितम्बतटे महाद्रौ नारायणाख्यमहिषी शुभदा विभाति ॥

End :

क्षराक्षरपरब्रह्म उदात्तादिः स्वराड् विराट् ।
स्वरवर्णोपकरणैर्भवर्णं तु विरेचयेत् ॥

* * * *

Colophon :

लक्ष्मीसंवादः समाप्तः ॥

(*b*) चोरसंवादः—आन्ध्रटीकासहितः.

CŌRASAṀVĀDAḤ WITH TELUGU MEANING.

Foll. 7*a*—13*b*.

This work also is written in commemoration of a festival celebrated in Viṣṇu temples. It is descriptive of the combat which is believed to have taken place between the robber chieftain Tirumaṅgaimannan and God Viṣṇu who came in disguise, and of the conversion of the former into a dignified Āḻvār after he realised that his opponent was really God Himself.

Complete.

Beginning :

पूर्णायां मृगयोत्सुकः परिचरन्दुष्टान् मृगान् मर्दयन्
राधे माघविपक्षपक्षविजयः पीताम्बरालंकृतः ।
केयूराङ्गदहारकुण्डलयुतः शिष्टान् जनान् पालयन्
भूलोके सुरनायको विजयते पञ्चाह्निकस्योत्सवे ॥

* * * *

माखे माशुभपूर्णमुख्यसुदिने भक्तौघपूजां हरे
स्वीकुर्वित्यनुचिन्त्य शोककलितो भूत्वा वनान्ते हरिम् ।

सम्यग्भूषणभूषितं कलिविजिच्चित्संज्ञकोऽयं पुनः
दृष्ट्वा हृष्टमना वभूव गुणिनामग्रेनरास्तेकथा(मग्रेसरस्त्वेकदा) ॥

* * * *

चोरेण तेन हृतहारसुवर्णचेलकेयूरकङ्कणमणीन्द्रवराङ्गुलीयः ।
भक्तप्रियः सर्व(सकल)लोकविभुस्त्विदानीं लज्जाद्भुतप्रकटितः स मुदान्वि-
[तोऽभूत् ॥

End :

यावत्सुधांशुरविमेरुकुलाद्रिसिन्धुस्ताराग्रहध्रुवनदीनदभूमिकल्पाः ।
तिष्ठन्ति रामचरितं भुवनेषु तावत् तिर्मङ्ग्याल्वरपि तिष्ठतु दासदासः ॥

Colophon :

चोरसंवादः समाप्तः ॥

Foll. 14, 15*a* and 16 contain a few lines in Telugu relating to the worship of the devotees of Viṣṇu. Fol. 15*b* is left blank.

(*c*) दशावतारमङ्गलाशासनम्.

DAŚĀVATĀRAMAṄGALĀŚĀSANAM.

Foll. 17.

Stanzas of praise addressed to the ten incarnations of God Viṣṇu coupled with a prayer to Him to bestow prosperity upon the reciter.

Beginning :

आदावम्बुजसंभवादिविनुतः शान्तोऽच्युतः शाश्वतः
संफुल्लामलपुण्डरीकनयनः पुण्यः पुराणः पुमान् ।

लोकेशः श्रुतिचोरसोमुख(दानव)हरो मत्स्यावतारो हरिः
श्रीमान्[नृ]सिंहगिरीश्वरः करुणया दद्यात्सदा मङ्गलम् ।

End:

म्लेच्छव्रातविनाशकः कलियुगान्तेऽश्वाधिरूढो महा-
मायावी बहुभानुकोटिसदृशो भीमांशुचक्रायुधः ।
यश्चाङ्गी(ङ्गी)कृतकलि(ल्कि)रूपविभवो भूमौ भविष्यान्वयः
श्रीमान् सिंहगिरीश्वरः करुणया दद्यात्सदा मङ्गलम् ॥

(*d*) सीताराघवमङ्गलाशासनम्.
SĪTĀRĀGHAVAMAṄGALĀŚĀSANAM.

Foll. 17*b*—18*b*.

Similar to the above. The stanzas are addressed to Rāma and Sītā, who are considered as incarnations of God Viṣṇu and Goddess Lakṣmī.

Complete.

Beginning:

लक्ष्मीशो भुवनत्रयी वसुधयो देवा मनुष्योरगाः
संस्थातुः करुणानिधेः करुणया मार्ताण्डवंशे ययौ ।
कौसल्यानिजगर्भसंभवकृतं जन्मन्यसाधारणं
जातः श्रीरघुनायकस्य जननं जी(दे)यादयं मङ्गलम् ॥

End:

वस्त्रग्रन्थिविमोचनं वधुवरैराज्यैकसन्तर्पणा
गर्भाधानपुरःसरं करतले राज्यैकसंशोभनम् ।
दिक्पालात्परमौनिपण्डितमहाश्रेयाः श्रियं लभ्यते (?)
सीताराघवयोर्विवाहसमये देयादयं मङ्गलम् ॥

Fol. 19 is left blank. Fol. 20*a* contains a few lines on Kanyādāna (gift of a daughter in marriage). Fol. 20*b* is left blank.

R. No. 920.

Palm-leaf. 16¼ × 1⅝ inches. Foll. 218. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

महाभारतविवरणम्.

MAHĀBHĀRATAVIVARAṆAM.

By Yajñanārāyaṇa. Same work as that described under R. No. 269(*a*) *ante*.

Contains the Udyōga, the Bhīṣma, the Drōṇa, the Karṇa, the Śalya, the Sauptika, the Śānti and the Ānuśāsanika Parvas complete and the Āśvamēdhika Parva incomplete.

R. No. 921.

Palm-leaf. 14 × 1⅞ inches. Foll. 54. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

The first two leaves are left blank.

आपस्तम्बसूत्रप्रयोगवृत्तिः.

ĀPASTAMBASŪTRAPRAYŌGAVṚTTIḤ.

By Tālavṛnatnivāsin. Same work as that described under No. 1073 of the D.C.S. MSS., Vol. II.

Contains the eighth Praśna only. This MS is said to have been copied by Challa Subrahmaṇyasōmayājin, the copying having been completed on Saturday, the 7th day of the bright fortnight of the Śrāvaṇa month, in the year Dundubhi.

R. No. 922.

Palm-leaf. 15 × 1⅞ inches. Foll. 30. Lines, 7 in a page. Telugu. Very much injured.

Purchased in 1913–14 from M.R.Ry Jaganmōhana Rao of Masulipatam.

(*a*) शतरुद्रीयमाहात्म्यम्.

ŚATARUDRĪYAMĀHĀTMYAM.

Foll. 1*a*—7*b*.

On the greatness and importance of the Śatarudramantra (hundred hymns relating to Rudra) occurring in the fifth Praśna of the fourth Kāṇḍa of the Yajurvēda.

Complete; as found in the Skāndapurāṇa.

Beginning:

श्रीमन्मुनिगणावर्ण्यं विद्यानां निधिमव्ययम् ।
स्निग्धनीरदसंकाशं वेदव्यासमकल्मषम् ॥
वेदव्यासं महात्मानं सरस्वत्या(स्प)दे शुभे ।
शतरुद्रीयमाहात्म्यं पप्रच्छुर्मुनयस्तदा ॥

* * * *

Colophon:

इति श्रीस्कान्दे महापुराणे शतरुद्रीयमाहात्म्ये प्रथमोऽध्यायः ॥

* * * *

यजुर्वेदे चतुर्थेऽस्मिन् काण्डे प्रश्नो हि पञ्चमः ।
अस्मिन् प्रश्ने शतरुद्रमन्त्रास्तिष्ठन्ति सिद्धिदाः ॥
तस्मादेतद्वेदसारं शतरुद्रीयमीरितम् ।

End:

एतज्जाप्यमृतो भूत्वा ब्रह्मभूयः प्रकल्पते ॥
एतत्ते शतरुद्रीयं न्यासध्यानादिकं शुभम् ।
मयोक्तं ब्राह्मणश्रेष्ठाः किं पुनः श्रोतुमिच्छथ ॥

Colophon:

इति श्रीस्कान्दपुराणे श्रीशतरुद्रीयमाहात्म्ये चतुर्थोऽध्यायः ॥

(*b*) रुद्रकल्पः.
RUDRAKALPAḤ.

Foll. 8*a*—30*b*.

Deals with the manner of repeating the one hundred Mantras relating to God Siva and with the rituals connected therewith. This MS. is said to have been copied by Bulusu Mṛtyuñjaya.

Beginning:

ऋषय ऊचुः—

भगवन् सर्वतत्त्वज्ञ व्यास नारायणांशज ।
काण्डे चतुर्थे यजुषि प्रश्नेऽस्मिन् पञ्चमे शुभे ॥

रुद्रमन्त्राः शतं तस्माच्छतरुद्रीयमीरितम् ।
नामानि श्रोतुमिच्छामस्तेषां व्यास महाप्रभो ॥

* * * *

नमो हिरण्येत्यारभ्य सत्त्वनां पतये नमः ।
एतत्पदान्ता विद्या स्यात् पार्वतीशसुरा स्मृता ॥

चतुर्मुखर्षिसंयुक्ता विराट्छन्दःसमन्विता ।
हृदयादिपदोपेता श्वपतिभ्यश्च वो नमः ॥

End:

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि
ओं त्वमग्ने द्युभिस्त्वं . . . शुचिः ।
शिवेन मे संतिष्ठस्व सुभू . . . उपते नमः ॥

The scribe adds—

वत्सरे पिङ्गले चैत्रे सिते पक्षे शुभे दिने ।
द्वादश्यां भानुवारे तु लिखितं रुद्रकल्पकम् ॥

R. No. 923.

Palm-leaf. 18½ × 1½ inches. Foll. 78. Lines, 7 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

Fol. 78*b* is left blank.

रामायणव्याख्या —वाल्मीकिभावप्रकाशिका.

RĀMĀYAṆAVYĀKHYĀ: VĀLMĪKIBHĀVAPRAKĀŚIKĀ

By Haripaṇḍita. Same work as that described under R. No. 580 *ante*.

Complete in six Kāṇḍas.

End:

अध्येत इत्यर्थो मोक्षः, तस्य सिद्धिं च लभत इत्यर्थः। साकल्यं च सायुज्यसालोक्यादिमुक्त्यवान्तरभेदाभिप्रायं द्रष्टव्यम् ॥

Colophon:

इति श्रीहरिपण्डितविरचितायां वाल्मीकिभावप्रकाशिकायां युद्धकाण्डः समाप्तः ॥

R. No. **924.**

Palm-leaf. 16 × 1¼ inches. Foll. 54. Lines, 6 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

The sixth leaf is found wanting.

रामायणव्याख्यानम्—भूषणम्.

RĀMĀYAṆAVYĀKHYANĀM: BHŪṢAṆAM.

A commentary on the Rāmāyaṇa of Vālmīki: by Prabalamukundasūri, probably a disciple of Padmanābhapaṇḍita.

Contains Adhyāyas 1—17 complete and 18 incomplete in the Ayōdhyākāṇḍa

Beginning:

इदानीं श्रीमदयोध्याकाण्डे कथां वक्तुमारभते—गच्छतेति। तदा पितृभ्रात्राद्यनुज्ञानन्तरं मातुलकुलं मातुलगृहम्; 'कुलं जनपदे गृहे' इति विश्वः। गच्छता भरतेन . . . . . घ्नः नित्यशत्रवः कामादयस्तान् हन्तीति नित्यशत्रुघ्नः अनघो निर्दोषो लक्ष्मणः बलवन्तं राममाश्रितः मयापि तद्वदेव भरताश्रयणं कर्तव्यमित्येवंरूपाचित्तकालुष्यरहित इत्यर्थः।

* * * *

Colophon:

इति श्रीदेववरपद्मनाभपण्डितसाम्राज्यधुरन्धरेण प्रबलमुकुन्दसूरिणा कृतायामयोध्याकाण्डव्याख्यायां श्रीरामायणभूषणाख्यायामयोध्याकाण्डे द्वितीयः सर्गः ॥

End:

पदातिः पादचारी सन् अपरे वैकक्ष्ये द्वारे जगाम शुद्धान्तःपुरं शुद्धं निर्दोषमन्तःपुरमिति कर्मधारयः । सरित्पीतः समुद्रः ॥

Colophon:

इति श्रीरामायणभूषणाख्यायामयोध्याकाण्डे सप्तदशः सर्गः ॥

स इति । सः श्रीरामः शुभे आसने पर्यङ्के निषण्णं शयानमित्यर्थः ।

* * * *

एष मन्युः संतोषः अपनीयतां त्यज्यताम् । वनं त्वं गन्तुमर्हसीत्यत्र हेतुमाह––यावदिति ।

R. No. **925.**

Palm-leaf. 16 × 1¼ inches. Foll. 107. Lines, 7 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

तर्कसारः.

TARKASĀRAḤ.

Foll. 1*a*—76*b*.

By Kompella Vēṅkaṭabhūpa. Same work as that described under No. 4188 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Pramēyabhāga.

The remaining foll. are duplicates of the foll. 47*a* to 76*b*.

R. No. **926.**

Palm-leaf. 17 × 1½ inches. Foll. 111. Lines, 7 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

The first five leaves are left blank.

(*a*) शिवगीता––सव्याख्या.

ŚIVAGĪTĀ WITH COMMENTARY.

Foll. 6*a*—87*a*.

For the text, see under No. 2546 of the D.C.S. MSS., Vol. IV. The commentary is by Brahmānandasvāmin, a disciple of Sadāśivatīrtha who is said to have been the disciple's disciple of the great Śaṅkarācārya.

Complete.

Beginning:

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वविद्यानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमम् ।
अम्बिकापतिमीशानमनीशं प्रणमाम्यहम् ॥

इह खलु स्वभावतः प्रतिकूलस्वरूपं सकलजनानुभवसिद्धं दुःखं परिजिहीर्षवः सर्व एव तत्प्रधानोपायमनुसरन्तस्तत्त्वज्ञानमेव तदुपायमाकलयन्तस्तदन्यमुपायमलभमानाः परमर्षयः सकलशास्त्रार्थतत्त्वकोविदं परमकारुणिकं सूतमासाद्य तमुपायमेव पृष्टवन्तः । तान् प्रति अथातः संप्रवक्ष्यामीति विशेषप्रतिज्ञापूर्वकं तमुपायमेव सूत उवाचेति व्यास आह—सूत उवाचेत्यादिना ।

सूत उवाच—

अथातः संप्रवक्ष्यामि शुद्धं कैवल्यमुक्तिदम् ।
अनुग्रहान्महेशस्य भवदुःखौघभेषजम् ॥

धर्मजिज्ञासून् ऋषीन् प्रतीति शेषः । अथशब्द आनन्तर्यवचनः व्रतादिधर्मजिज्ञासापगमानन्तरम् । मङ्गलार्थो वाथशब्दः ।

End:

यत्त्वत्रिवचनम्—

' सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा ।
उभे सन्ध्ये तु कर्तव्ये ब्राह्मणैः स्वगृहेष्विति ॥ '

तस्यायमाशयः—यद्यपि बहिरेव सन्ध्यात्रयं कर्तव्यं प्रशस्तम्, तथापि यदा विहरणाद्यङ्गलोप . क्तिः स्यात् तदा श्रौतस्य विपाकरणस्य प्राबल्यात् तदनुरोधेन द्वे सन्ध्ये गृहेऽप्यनुष्ठेये इति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यप्रशिष्यसदाशिवतीर्थकरुणापात्रभूतब्रह्मानन्दस्वामिविरचितायां शिवगीताव्याख्यायां मोक्षाधिकारिनिरूपणं नाम षोडशोऽध्यायः ॥

Foll. 87a—88b contain a few stanzas regarding Bhūdānamāhātmya.

(b) चमकभाष्यम्.

CAMAKABHĀṢYAM.

Foll. 89—95b.

By Sāyaṇācārya. Same work as that described under No. 139 of the D.C.S. MSS., Vol. I, Part II.

Complete.

(c) पुरुषसूक्तभाष्यम्.

PURUṢASŪKTABHĀṢYAM.

Foll. 96a—100a. The remaining foll. are left blank.

By Sāyaṇācārya. Same work as that described under No 209 of the D.C.S. MSS, Vol. I, Part II.

Complete.

R. No. **927.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 13. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1913-14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

Fol. 2b is left blank.

वैश्यप्रवरखण्डः.

VAIŚYAPRAVARAKHAṆḌAḤ.

Deals with the line of the ancestors of the various sections of the Vaiśya community beginning with the ancient Ṛṣis or sages.

Wants beginning and end.

Beginning :

धनगूणामेकार्षेयः—व्यासेति। धेनूनां त्र्यार्षेयः—काण्र्यबाहस्पत्यकाव्येति। अथ पञ्चशिष्टानां पञ्चार्षेयः मौनिराजकालंकायनिशावल्क्यश्यामकनायपूर्वेति।

End :

वारुणवैश्वआज्यत्र्यार्षेयप्रवरान्वितवेलाशिष्टान्वयवारुणगोत्रः अस्य संगुप्तिनामवेलशिष्टकुलः ॥

R. No. **928.**

Palm-leaf. 21 × 1⅜ inches. Foll. 103. Lines, 6 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

वैद्यचिन्तामणिः—आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Foll. 1*a*—74*a*.

A comprehensive treatise describing the various diseases and curative measures and medicines that should be administered for those diseases: by Vallabhēndra. The work with its Telugu commentary is printed in the Hinduratnākaramudrākṣaraśālā in Madras.

Incomplete.

This MS. is said to have been copied by Tsalla Vēṅkaṭarāmayya and Bhujji Rāmayya from the MS. of Vēṅkaṭappayya, the copying having been completed on Sunday, the 2nd day of the bright fortnight of the month of Āṣāḍha or Āḍi in the year Virōdhi.

Beginning :

श्रीनाथं पार्वतीनाथं वाणीनाथं सरस्वती(म्) ।
दुर्गावटुकहेरम्बा(न्)नमस्तेसतता(सततं च नमा)म्यहम् ॥
श्रीवत्सगोत्रतिलकं(कः)जगद्धर्त(द्वैद्य)पितामहः ।
अमरेश्वरभट्टश्च(स्य) प्रियसूनुर्गुणान्वितः ॥

वल्लभेन्द्रं विरचितं ज्ञानानां (तादृशा वल्लभेन्द्रेण क्रियते) हितकारणः॥
वैद्यचिन्तामणिर्नाम भैषज्यग्रन्थ उत्तमः ॥
निदाने द्रव्यसुमतिः रसयोगकषायकाः ।
वक्ष्यते वैद्यलाभाय (एतत्सर्वं सविस्तरम्) ॥

* * * *

आदौ समस्तरोगेषु अष्टस्थानं परीक्षयेत् ।
नाडीं स्पर्शं च रूपं च शब्दनेत्रे पुरीषयोः(कम्) ।
मूत्रं वर्णं च जिह्वां च एतादृ(न्पश्ये)द्भिषग्वरैः(रः) ॥

End:

शीतं चन्दनमिन्दुषड्विषहरं तद्वाततत्कान्तिदं
कण्डूकुष्ठविसर्पदाहशमनं रक्तप्रमेहापहम् ।
त्वङ्मूत्रप्रदरं भ्रमश्रमहरं लक्ष्मीकरं श्रीकरं
स्त्रक्पित्तक्षयनैकरोगहरणं पित्तं कषायान्वितम् ॥

* * * *

. . . . . ग्रन्थकोटीव बर्बरम् ॥

R. No. **929.**

Palm-leaf. $16\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 68. Lines, 5 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry Jaganmōhana Rao of Masulipatam.

(*a*) **वासुदेवमननम्.**

VĀSUDĒVAMANANAM.

Foll. 1*a*—65*b*.

This is the work a summary of which is described under R.No. 124 *ante*.

Complete in eight Prakaranas.

Beginning:

यस्यात्मभूतस्य गुरोः प्रसादादहं विमुक्तोऽस्मि शरीरबन्धात् ।
सर्वोपदेष्टुः पुरुषोत्तमस्य तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

मूढान् विवेकिनः कृत्वा लोके सर्वोपदेशतः ।
यस्तिष्ठति च तं श्रीमद्वासुदेवगुरुं भजे ॥

साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यार्थविचारपूर्वकमात्मानात्मविवेकः कथ्यते । साधनचतुष्टयं नाम—नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसंपत्तिः, मुमुक्षुत्वं च ।

End:

एवंप्रकारेणागामिसंचितप्रारब्धकर्मणां सम्यग्विचारं कृत्वा अहंकारस्यैव नात्मन इति यो जानाति स एव मुक्तः स एव कृतकृत्यः ॥

Colophon:

इत्यष्टमप्रकरणं समाप्तम् । वासुदेवमननं समाप्तम् ॥

(*b*) अद्वैतवेदान्तरहस्यकारिकावलिः.
ADVAITAVĒDĀNTARAHASYAKĀRIKĀVALIḤ.

Foll. 66*a*—68*a*. Fol. 68*b* is left blank.

A short treatise on the leading principles of the Advaitavēdanta in stanzas of the Anuṣṭup metre.

Complete.

Beginning:

वक्ष्ये रहस्यमत्यन्तं साक्षाद्ब्रह्मप्रकाशकम् ।
सर्वोपनिषदामर्थं सर्वलोकेषु दुर्लभम् ॥

प्रज्ञानं ब्रह्म ऋग्वेदे पदद्वयसमन्वितम् ।
महावाक्यं चतुर्वाक्यमृग्यजुःसामसंभवम् ॥
मम प्रज्ञैव ब्रह्माहं ज्ञानमात्रमिदं जगत् ।
ज्ञानमेव जगत्सर्वं ज्ञानादन्यन्न विद्यते ॥
जीवः प्रज्ञानशब्दस्य ब्रह्मशब्दस्य चेश्वरः ।
अखण्डैकरसं वस्तु विदेहान्मुक्तिरुच्यते ॥

End :

एतत्सर्वं महामिथ्या नास्ति नास्ति न संशयः ।
सर्वं नास्ति न संदेहः सर्वं मिथ्या न संश(यः) ॥
. . . . मुत्तमोऽयं न संशयः ।
ब्रह्मेदं बृंहिताकारं तद्ब्रह्माहं न संशयः ॥

R. No. **930.**

Palm-leaf. 18 × 1¼ inches. Foll. 74. Lines, 7 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) गोपालमन्त्रकल्पः.

GŌPĀLAMANTRAKALPAḤ.

Foll. 1*a*—21*b*.

On details connected with the repetition of the Gōpālamantra addressed to Lord Kṛṣṇa.

Complete in five Paṭalas; as found in the Sanatkumāra-saṁhitā.

Beginning :

सनत्कुमारयोगीन्द्रं सिद्धाश्रमनिवासिनम् ।
ब्रह्मनिष्ठं मुनिं शान्तं प्रसन्नादित्यतेजसम् ॥
विनयेनोपसंगत्य शिरसा प्रणिपत्य च ।
नारदः परिपप्रच्छ देवर्षिः सर्वकालवित् ॥

श्रीनारदः—

भगवन् योगिनां श्रेष्ठ भवसागरतारक ।
श्रुतानि सर्वमन्त्राणि मया त्वत्तो विशेषतः ॥
अपरोक्षं येन जातं परस्य ब्रह्मणो रहः ।
इदानीं श्रोतुमिच्छामि सर्वमन्त्रोत्तमोत्तमम् ॥

* * * *

ध्यायेन्नित्यं जपेन्नित्यं मोक्षार्थी त्रिसहस्रकम् ।
संसारसागरं तीर्त्वा याति विष्णोः परं पदम् ॥
बहुना किमिहोक्तेन धर्मकामार्थमुक्तिदम् ।
मन्त्रमेतत्समाख्यातं किं भूयः श्रोतुमिच्छसि ॥

Colophon:

इति श्रीसनत्कुमारसंहितायां संमोहनतन्त्रे श्रीमदनगोपालाष्टादशाक्षरमन्त्रकल्पो नाम प्रथमः पटलः ॥

End:

उक्ता अष्टादशार्था याः क्रिया मन्त्रान्तरेष्वपि ।
अमुनैव विधेयास्ता मनुना मनुवित्तमैः ॥
नारदायोपदिश्यैवं गोपालकमहामनुम् ।
सनत्कुमारयोगीन्द्रो ययौ(मौ)सिद्धाश्रमाद्ययौ ॥

Colophon:

इति श्रीसनत्कुमारसंहितायां श्रीसंमोहनगोपालमन्त्रकल्पे पञ्चमः पटलः ॥

(*b*) रामार्चनचन्द्रिका.

RĀMĀRCANACANDRIKĀ.

Foll. 22*a*—37*a*. Foll. 37*b* to 74*b* are left blank.

By Ānandavana. Same work as that described under No. 8683 of the D.C.S. MSS., Vol. XVI.

Contains the first Paṭala.

R. No. **931.**

Palm-leaf. 17¾ × 1¼ inches. Foll. 111. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

On fol. 1 is found a partition agreement made in Pudalūr between the sons of Pinnabudhavāṇi.

(*a*) आरुणकेतुकचयनप्रयोगः.

ĀRUṆAKĒTUKACAYANAPRAYŌGAḤ.

Foll. 1*a*—16*a*.

Similar to the work described under No. 1132 of the D.C.S. MSS., Vol. II.

Complete

Beginning:

आरुणकेतुकं चेष्यमाण उपकल्पयते सम्भारान् । आतपति वर्ष्याः कूप्यास्स्थावरा वहन्तीस्सम्भार्याः पल्वल्या जीवन्तं कूर्मं दीर्घदण्डं पुष्करपर्णं यावतस्संवत्सरस्य रात्रयस्तावतीर्मृन्मयाः क्षुद्रकुम्भान् (ताव)त्सङ्ख्याकान्

* * * *

अजक्षीरं वालुकाश्चेति । अस्याग्नेः पुरस्तात्स्थानद्वयमादौ प्रातरग्निहोत्रं हुत्वा प्राणानायम्य आरुणकेतुकमग्निं चेष्यमाणो मासद्वयं व्रतं चरिष्यामीति सङ्कल्प्य ततः स्नात्वा लौकिकमग्निमुपसमाधाय ।

End:

अध्वर्युर्वैद्युतास्तया यजमानो वैद्युतानां रुद्राणां स्थाने स्वतेजसा भानि । तया एतासूपहितासु पत्नी प्रभ्राजमाणानां रुद्राणीनां स्थाने स्वतेजसा भानि इत्येकादशभिरनुमन्त्रयते । ओं भूर्भुवः सुवः । रूपाणि वो मिथुनं मानो मिथुनं रीढ्वम् इति यजमान उपहिता उपतिष्ठते ॥

आरुणकेतुको व्याख्यात इति आपस्तम्बोक्तत्वात् तदनुसारेण ॥

Foll. 16*a*—18*a* contain a few lines regarding **चयनप्रयोग.** Fol. 18*b* is left blank.

(*b*) इष्टिप्रयोगः.

IṢṬIPRAYŌGAḤ.

Foll. 19*a*—26*b*. Fol. 27 is left blank.

Similar to the work described under R.No. 70 *ante*.

Complete.

Beginning:

अथातो दिवःश्येनेष्टिविधिं व्याख्यास्यामः—

अग्नये कामाय पुरोडाशमष्टाकपालमाशायै चरुमनुमत्यै चरुं तस्यास्सप्तदश सामिधेन्यो वार्त्रघ्नावाज्यभागौ. अनुषङ्गेण यजेतेति विज्ञायते। आशा प्रथमां कामो द्वितीयां ब्रह्म तृतीयाम् ।

End:

स्वाहा देवा आज्यपा इत्यादि आज्यभागाविष्ट्वा आग्नेयं प . . पर्य चरणं पवित्रं विततम् (.) अरातिं तरेमोम्। ये (.) हे। चरणं (.) (.) लोकस्य द्वार (.) ददातु वौ। अनुमत्यादि स्विष्टकृतः सूक्तवाकादिसंस्थाजपान्तम् ।

Colophon:

इति चरणेष्टिः पञ्चमापाघेष्टिः समाप्ता ॥

Fol. 27 is left blank.

(*c*) आपस्तम्बशुल्बसूत्रव्याख्या—शुल्बप्रदीपिका.

ĀPASTAMBAŚULBASŪTRAVYĀKHYĀ: ŚULBAPRADĪPIKĀ.

Foll. 28*a*—80*b*.

A commentary by Karavindasvāmin on the Āpastambaśulbasūtra, for a description of which work see under No. 1058 of the D.C.S. MSS., Vol. II. The commentary is called Śulbapradīpikā.

Complete.

Beginning:

ओमित्येकाक्षराख्येयं वरदं मनसाधिकम् ।
पश्यन्ति सूरयो यद्धि तद्विष्णोः परमं पदम् ॥
ज्योतिर्मे हृदये भूयात्सदा राजीवलोचनम् ।
आपस्तम्बाय मुनये नमो वेदार्थभूमय(ये) ॥

यत्सूत्रसक्तास्तिष्ठन्ति यज्ञश्रुतिकुमारिकाः ।
तत्सूत्रशुल्बव्याख्येयमक्षरार्थविबोधनी ॥
करविन्दाधिपेनाद्य क्रियते भाष्यकृन्मते ।

यज्ञव्याख्याप्रतिज्ञां कुर्वता भगवतापस्तम्बेन व्याख्येयतया हविर्यज्ञाः पाकयज्ञाः सोमयज्ञाश्च प्रतिज्ञाता व्याख्याताश्च ।

* * * *

यज्ञव्याख्यानानन्तरं विहारयोगव्याख्या क्रियते। विहारो विहरणं योगस्तत्साधनं विहाराणां योगाः विहारयोगाः तान् व्याख्यास्यामः प्रतिपादयिष्यामः ।

End:

एतदुक्तं भवति—त्रिस्तावैकविंशप्रकारद्वयविधे त्रिस्ताव एकविंशोऽग्निः ब्राह्मणदर्शनात् द्वादशशतं वा । द्विरुक्तिः प्रश्नसमाप्त्यर्था ॥

Colophon:

इति करविन्दस्वामिकृतायां शुल्बप्रदीपिकायां षष्ठः पटलः ॥
करविन्दाधिपकृता सेयं शुल्बप्रदीपिका ।
द्योततां हृदयागारे सतामाचन्द्रतारकम् ॥

(*d*) आपस्तम्बशुल्बसूत्रव्याख्या.
ĀPASTAMBAŚULBASŪTRAVYĀKHYĀ.

Foll. 81*a*—111*b*.

By Sundararāja. Same commentary as that described under R. No. 911(*a*) *ante*.

Complete.

The copying of this work is said to have been begun on the 11th day of the bright fortnight of the Āśvija and completed on the 5th day of the bright fortnight of the Mārgaśiras in the year Bhava by Narasiṁhan, son of Naiṣadam Pinna Subrahmaṇyasōmayājin.

The scribe adds—

शके षट्त्रिंशदधिके तस्मिन् भावाब्दसंज्ञके ।
नैषधान्वयसंभूतब्रह्मण्याध्वरिणः सुतः ॥
नारासिंहस्य नाम्ना तु लिखितं तु प्रदीपकम् ।
सुन्दरं करविन्दाख्यं व्याख्यासंपूर्तिकं प्रतिम् ।
दृष्ट्वैवं कर्मकाण्डस्य मीमांसोक्तमनुक्रमात् ॥

R No. 932.

Palm-leaf. 17 × 1¾ inches. Foll. 304. Lines, 6 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Fol. 1*a* gives the name of the former owner of this MS. as Chāgaṇṭi Pīṭha Janārdana Pantulu. Fol. 1*b* is left blank.

भागवतम्—भावार्थदीपिकासहितम्.

BHĀGAVATAM WITH BHĀVĀRTHADĪPIKĀ.

Foll. 2*a*—304*a*. Fol. 304*b* is left blank.

Same work as that described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I. The commentator is Śrīdharasvāmin.

Contains the first three Skandhas complete.

R. No. 933.

Palm leaf. 17¾ × 1½ inches. Foll. 277. Lines, 7 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I.

Skandhas ten to twelve.

The scribe adds—

अस्मिन् भागवते लिलेख नवमादिद्वादशान्तांश्चतुः-
स्कन्धानीवनिपोचिराजकुलजः श्रीकोण्डवीजीक्षितौ।
कृष्णारोधसि वीरभद्रतनयः शाण्डिल्यगोत्रोद्भवः
सर्वं दुर्मुखिवर्षभाद्रपदशुद्धद्वादशीवासरे ॥

Fol. 277*b* is left blank.

R. No. **934.**

Palm-leaf. 18¼ × 1½ inches. Foll. 122. Lines, 7 in a page. Telugu Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Fol. 104*b* is left blank.

भागवतम्.

BHĀGAVATAM.

Same work as the above.

Skandhas seven to nine and twelve complete.

R. No. **935.**

Palm-leaf. 17⅞ × 1⅜ inches. Foll. 86. Lines, 7 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 59*b*, 60*b*, 64*b* are left blank.

भागवतम्.

BHĀGAVATAM.

Same work as the above.

Contains the Skandhas two, three, seven and ten.

R. No. 936.

Palm-leaf. 18×1⅝ inches. Foll 132. Lines, 8 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam

महाभारतम्.

MAHĀBHĀRATAM.

Same work as that described under No. 1947 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Śāntiparvan only. This MS. is said to have been copied by Pōtarāju Vīrarāghava.

R. No. 937.

Palm-leaf. 18×1¼ inches. Foll. 152. Lines, 6 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

रामायणव्याख्या—रामायणतत्त्वदीपिका.

RĀMĀYAṆAVYĀKHYĀ : RĀMĀYAṆATATTVA-DĪPIKĀ.

By Mahēśvaratīrtha. Same work as that described under No. 1877 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Ayōdhyākāṇḍa which wants three leaves in the beginning.

R. No. 938.

Palm-leaf. 17½×1¼ inches. Foll. 67. Lines, 6 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

रामायणव्याख्या—रामायणतत्त्वदीपिका.

RĀMĀYAṆAVYĀKHYĀ : RĀMĀYAṆATATTVA-DĪPIKĀ.

By Mahēśvaratīrtha. Same work as the above.

Contains the Āraṇyakāṇḍa.

R. No. **939.**

Palm-leaf. 16¾ × 1½ inches. Foll. 144. Lines, 7 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Same work as that described under No. 2129 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

R. No. **940.**

Palm-leaf. 17¼ × 1½ inches. Foll. 143. Lines, 8 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

भगवद्गीता—पदयोजनासहिता.

BHAGAVADGĪTĀ WITH PADAYŌJANĀ.

The commentary is by Rāmacandrānandasarasvatī.

Same work as that described under No. 2068 of the D.C.S. MSS., Vol. IV, Part I.

Wants two leaves in the beginning; otherwise complete.

R. No. **941.**

Palm-leaf. 17¾ × 1½ inches. Foll. 99. Lines, 7 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

पञ्चदशी—सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

The text is by Vidyāraṇya and the commentary by Rāmakṛṣṇa. Same work as that described under No. 4623 of the D.C.S. MSS., Vol. IX.

Contains Nāṭakadīpa in the Dīpaprakaraṇa, and the Vivēka and the Ānanda Prakaraṇas.

R. No. 942.

Palm-leaf. 17¼ × 1⅜ inches. Foll. 89. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

पञ्चदशी—सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

Same work as the above.

Contains from Citradīpa to Dhyānadīpa in the Dīpaprakaraṇa.

R. No. 943.

Palm-leaf. 17 × 1¼ inches. Foll. 72. Lines, 5 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

सरस्वतीविलासः.

SARASVATĪVILĀSAḤ.

By Pratāparudradēva. Same work as that described under No. 3221 of the D.C.S. MSS., Vol. VI.

Vyavahārakāṇḍa incomplete.

R. No. 944.

Palm-leaf. 18¼ × 1¼ inches. Foll. 106. Lines, 6 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

By Śaṅkarācārya. Same work as that described under No. 2048 of the D.C.S. MSS., Vol. IV, Part I.

Contains the first nine Adhyāyas complete.

R. No. **945.**

Palm-leaf. 15½ × 1⅜ inches. Foll. 50. Lines, 7 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) कृष्णयजुर्वेदमन्त्रप्रश्नः.

KRṢṆAYAJURVĒDAMANTRAPRAŚNAḤ.

Foll. 1*a*—23*a*.

Same work as that described under No. 237 of the D.C.S. MSS., Vol. I, Part II.

Complete.

(*b*) आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Foll. 23*b*—35*b*.

Same work as that described under No. 1180 of the D.C.S. MSS., Vol. II.

Complete.

(*c*) आपस्तम्बपितृमेधसूत्रम्.

ĀPASTAMBAPITṚMĒDHASŪTRAM.

Foll. 36*a*—49*b*. Fol. 50 is left blank.

This work deals with the religious rites to be performed after death in accordance with the school of Āpastamba. At the end of the Praśnas, the scribe says that he has copied Bharadvājasūtra while in the colophon the work is said to be by Āpastamba.

This manuscript is said to have been copied by one Lakṣmaṇan of Neykkuṉṟam, the copying having been completed on the 22nd day of the month of Āvaṇi in the year Śōbhakṛt.

Complete in two Praśnas.

Beginning:

अथातः पैतृमेधिकपुरुषाहुतिर्ह्वियस्य प्रियतमेति विज्ञायते । आहिताग्नेर्मरणसंशये प्राचीनावीती दहनदेशं जोषयते दक्षिणाप्रत्यक्प्रवणमनिरिणमसुषिरमनूषरमभङ्गुरमनुपहतमविस्रग्दार्यनुपच्छिन्नप्रत्यक्प्रवणम् ।

End:

पशुना यजेत गिरिं गत्वा अग्नये कामायेष्टिं निर्वपेदीप्सितैः क्रतुभिर्यजेतेति यजेतेति ॥

यद्याहिताग्निस्तानि ग्राममर्यादां यद्यात्मन्यरण्योर्वाथ यदि

* * * *

अथातो यजेतेति यजेतेति ॥

Colophon:

आपस्तम्बसूत्रद्वादशप्रश्नः समाप्तः ॥

R. No. **946.**

Palm-leaf. 16 × 1¼ inches. Foll. 158. Lines, 6 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) शिवपुराणम्.

ŚIVAPURĀṆAM.

Foll. 1*a*—81*b*.

Same work as that described under No. 2363 of the D.C.S. MSS., Vol. IV, Part II.

Breaks off in the seventy-third Adhyāya.

(*b*) सौन्दर्यलहरी—आन्ध्रटीकासाहिता.

SAUNDARYALAHARĪ WITH TELUGU MEANING.

Foll. 85*a*—122*a*.

By Śaṅkarācārya. Same work as that described under No. 48 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., No. 2, but with Telugu meaning.

Complete.

(*c*) श्यामलादण्डकः—आन्ध्रटीकासहितः.

ŚYĀMALĀDAṆḌAKAḤ WITH TELUGU MEANING.

Foll. 122*b* —130*b*.

By Kālidāsa. Same work as that described under No. 10837 of the D.C.S. MSS., Vol. XIX, but with Telugu meaning.

Complete.

(*d*) महिम्नःस्तोत्रम्—आन्ध्रटीकासहितम्

MAHIMNASSTŌTRAM WITH TELUGU MEANING.

Foll. 131*a*—144*a*. Fol. 144*b* is left blank.

Same hymn as that described under R.No. 399 *ante* and No. 11103 of the D.C.S MSS., Vol. XIX, but with Telugu meaning.

Complete.

(*e*) शिवकवचम्—आन्ध्रटीकासहितम्.

ŚIVAKAVACAM WITH TELUGU MEANING

Foll. 145*a*—158*b*.

Same work as that described under No. 7381 of the D.C.S. MSS., Vol. XIV.

Almost complete.

R. No. **947**.

Palm-leaf. 18¼ × 1½ inches. Foll. 173. Lines, 7 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) नामलिङ्गानुशासनम्—आन्ध्रव्याख्यासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH TELUGU COMMENTARY

Foll. 1*a*—98*b*. Foll. 9*b*, 10*b*, 21*b*, 24*b*, 27*b*, 49*b*, 54*b*, 55*b*, 63*b*, 67*b*, 83*b*, 87*b* and 99 are left blank.

Same work as that described under No. 1620 of the D.C.S. MSS., Vol. III, but with a Telugu commentary called Viśēṣaśabdacintāmaṇi which was written by Māmāḍi Vēṅkaṭārya, son of Vēṅkaṭavarya and Vijayalakṣmī. It is stated in the colophon

that the commentator belongs to the Vaiśya caste and that he is a disciple of Mallikārjuna who is said to be a descendant of Udbhaṭārādhya.

Contains the first Kāṇḍa complete.

Colophon :

इति श्रीमद्गुहेश्वरपदपद्माराधनसुधास्वादनपारीणेन तत्करुणाकटाक्ष-लब्धसरससाहित्यान्ध्रगीर्वाणकविताचातुरीधुरीणेन उद्भटाराध्यान्वयगुरु-मल्लिकार्जुनभक्तिपरायणेन वैश्यकुलपद्माकरविभाकरेण मामडिवंशपाथोराशि-सुधाकरेण व्यालकुलसगोत्रपवित्रेण विद्वदनुग्रहपात्रेण वेङ्कटवर्यतनूभवेन विजयलक्ष्मीगर्भशुक्तिभवेन वेङ्कटार्येण विरचितायां सशेषामरकोश-व्याख्यायां विशेषशब्दचिन्तामणिसमाख्यायां प्रथमः काण्डः ॥

(*b*) दत्तपुत्रविधिः.

DATTAPUTRAVIDHIḤ.

Foll. 100*a*—108*b*. Fol. 109 is left blank.

Same work as that described under No. 3157 of the D.C.S. MSS., Vol. VI.

Incomplete.

(*c*) सौन्दर्यलहरी—सव्याख्या.

SAUNDARYALAHARĪ WITH COMMENTARY.

Foll. 110*a*—159*a*.

The text is by Śaṅkarācārya and the commentary by Lakṣmīdhara. Same work as that described under No. 10866 of the D.C.S. MSS., Vol. XIX.

Wants the introduction in the commentary and ends in the 46th stanza.

Foll. 156 and 159—168*b* are left blank.

(*d*) अघविवेचनम्.

AGHAVIVĒCANAM.

Foll. 169*a*—172*b*. Fol. 173 is left blank.

By Rāmacandrādhvarin. Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V.

Incomplete.

R. No. **948.**

Palm-leaf. 17¾ × 1½ inches. Foll. 286. Lines, 7 in a page. Telugu. Fair.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

The first 22 foll. and the last page are left blank.

चतुर्वर्गचिन्तामणिः.

CATURVARGACINTĀMAṆIḤ.

By Hēmādri. Same work as that described under No. 2744 of the D.C.S. MSS., Vol. V.

Contains the Prāyaścittakāṇḍa incomplete.

R. No. **949.**

Palm-leaf. 15¾ × 1½ inches. Foll. 101. Lines, 6 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 19*b*, 46*b*, 64*b* and 101*b* are left blank.

नामलिङ्गानुशासनम्—आन्ध्रव्याख्यासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH TELUGU COMMENTARY.

Same work as that described under R. No. 947 *ante*.

Contains the third Kāṇḍa.

This MS. is said to have been copied by Kōndūri Vēṅkaṭarāya, the copying having been completed on the 6th day of the bright fortnight of the month of Phālguna in the year Durmati.

R. No. 950.

Palm-leaf. 17 × 1½ inches. Foll. 80. Lines, 10 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

भगवद्गीताभाष्यविवेचनम्.

BHAGAVADGĪTĀBHĀṢYAVIVĒCANAM.

By Ānandajñāna or Ānandagiri, a pupil of Śuddhānanda.

Same work as that described under No. 2055 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the twelfth Adhyāya.

R. No. 951.

Palm-leaf. 14¾ × 1⅛ inches. Foll. 55. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 50*b* and 55*b* are left blank.

पञ्चतन्त्रसंक्षेपः.

PAÑCATANTRASAṄKṢĒPAḤ.

Contains all the five Tantras complete.

A summary of the Pañcatantra written in an easy style for the use of youngsters.

Beginning:

मनवे वाचस्पतये पराशराय शुक्राय ससुताय ।
चाणक्याय च विदुषे नमोऽस्तु नीतिशास्त्रकर्तृभ्यः ॥
ग्रन्थविस्तारभीरूणां बालानामल्पचेतसाम् ।
बोधाय पञ्चतन्त्राख्यमिदं संक्षिप्य कथ्यते ॥
अन्यदीयो विलिखितः श्लोकोऽयं प्रक्रमागतः ।
स्वल्पत्वाद्ग्रन्थबाहुल्यान्मोदस्तेन न जायते ॥

अस्ति सकललोकाधिष्ठानं सुकविविद्वज्जनानिवासं पाटलीपुरं नाम नगरम्। तत्र सकलगुणोपेतः सुदर्शनो नाम राजासीत्। स चात्मीय-पुत्राणामनधिगतशास्त्राणामनुष्ठानानुपयोगे उद्विग्नमनाश्चिन्तयामास।

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः।
तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी॥

End:

तथाच—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥

Colophon:

इति पञ्चतन्त्र्यामसमीक्ष्यकारित्वं नाम पञ्चमं तन्त्रं समाप्तम्॥

R. No. **952.**

Palm-leaf. 15¼ × 1⅝ inches. Foll. 104. Lines, 7 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry Jaganmōhana Rao of Masulipatam.

कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Same work as that described under No. 142 of the D.C.S. MSS., Vol. I, Part II.

Contains the 2nd Aṣṭaka.

R. No. **953.**

Palm-leaf. 9¼ × 1⅜ inches. Foll. 34. Lines, 6 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) छान्दोग्योपनिषद्भाष्यम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAM.

Foll. 1*a*—23*b*. Fol. 24 is merely a duplicate of fol. 13.

By Śaṅkarācārya. Same work as that described under No. 464 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyāya incomplete.

(*b*) छान्दोग्योपनिषल्लघुव्याख्या.

CHĀNDŌGYŌPANIṢALLAGHUVYĀKHYĀ.

Foll. 25*a*—34*b*.

A short commentary in accordance with the Advaita-Vēdānta on the Chāndōgyōpaniṣad, which is described under No. 450 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyāya.

Beginning :

तृतीयाध्याये सर्वं खल्विदं ब्रह्म तज्जलानीति जगतो ब्रह्मज(नि)-लयस्थि(र)त्वमुक्तम् । तत्साधयितुमव्यवहितेन एतस्मिन् ब्रह्मविधिभुक्ते सर्वं जगत्तृप्यतीत्युक्तम् । तच्च आत्मन एकत्वे सत्येवोपपद्यते । इदमपि साधयितुं षष्ठोऽध्यायः प्रवर्तते । तत्पितुरुपदेष्टृत्वेनाविद्यायाः स्वारिष्टत्वद्योतनार्थमाख्यायिकामारचयति——श्वेतकेतुरिति । श्वेतकेतुर्नामतः । अरुणस्यापत्यमारुणिः, तस्यापत्यमारुणेयः । आस बभूव । तं पुत्रं ह पिता आरुणिरुवाच । किं हे श्वेतकेतो गुरुं प्रति गत्वा ब्रह्मचर्यं वस अध्ययनार्थमित्यर्थः ।

End :

निर्वृतिश्रुतिराह——तथेति । अस्य पितुर्ह किल । तत् तत्त्वमसि दृष्टान्तैर्हेतुभिश्चोक्तं कार्यकारणेभ्यः प्रविभक्तमात्मतत्त्वं श्वेतकेतुः सदेवाहमस्मीति विजज्ञौ ज्ञातवान् । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥

Colophon :

इति षष्ठोऽध्यायः ॥

R. No. **954.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 32. Lines, 8 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

पूर्वप्रयोगः.

PŪRVAPRAYŌGAḤ.

According to Āpastamba. Similar to the work described under No. 3695 of the D.C.S. MSS., Vol. VII.

Wants both the beginning and the end.

R. No. **955.**

Palm-leaf. $12 \times 1\frac{3}{8}$ inches. Foll. 15. Lines, 6 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) आशौचत्रिंशच्छ्लोकी—आन्ध्रटीकासहिता.

ĀŚAUCATRIṀŚACCHLŌKĪ WITH TELUGU MEANING.

Foll. 1*a*—7*b*.

Same work as that described under No. 3020 of the D.C.S. MSS., Vol. V.

Almost complete.

(*b*) पर्जन्यशान्तिः.

PARJANYAŚĀNTIḤ.

Foll. 8*a*—15*b*.

Slightly different from the work described under No. 3673 of the D.C.S. MSS., Vol. VII.

Incomplete.

R. No. **956.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 156. Lines, 8 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 37*b*, 47*b*, 53*b*, 55*b*, 62*b*, 71*b*, 95*b*, 97*b*, 101*b*, 116*a*, 118*b* and 140*b* are left blank.

नामलिङ्गानुशासनम्—आन्ध्रव्याख्यासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH TELUGU COMMENTARY.

Same work as that described under R.Nos. 947 and 949 *ante.*

The text breaks off in the Vanauṣadhivarga of the second Kāṇḍa and the commentary at the end of Śailavarga of the same Kāṇḍa.

R. No. 957.

Palm-leaf. 15⅝ × 1¼ inches. Foll. 304. Lines, 7 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

नैषधव्याख्या.

NAIṢADHAVYĀKHYĀ.

The well-known commentary on the Naiṣadha of Śrī-Harṣa: by Mallinātha.

Contains the first ten Sargas.

R. No 958.

Palm-leaf. 17¼ × 1½ inches. Foll. 142. Lines, 8 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Fol. 112*b* is left blank.

नामलिङ्गानुशासनम्—आन्ध्रव्याख्यासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH TELUGU COMMENTARY.

This Telugu commentary here is by Kāṭūri Mallakavi.

Wants beginning in the second Kāṇḍa and ends in the third Kāṇḍa.

The commentator adds this stanza at the end of Śūdravarga.

काट्टूरिमल्लपुकविः सान्वयमूलं त्रिलिङ्गपदभागम् ।
अभिधेयामरकोशं विबुधाह्लादं विचित्रमंकरोत् ॥

This manuscript is said to have been copied by Apparāju Vāsudēvaḍu for Māmiḍi Sūraṇṇa from the manuscript transcribed by Varagu Surappagāru, the copying having been completed on Tuesday, the 3rd day of the bright fortnight of the Bhādrapada month in the year Vibhava.

R. No. 959.

Palm-leaf. 17 × 10 inches. Foll. 42. Lines, 6 in a page. Telugu. Much injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ.

Foll. 1*a*—31*a*. Foll. 8*b* and 31*b* are left blank.

Same work as that described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains the fourth Kāṇḍa complete.

(*b*) पुनःसन्धानप्रयोगः.

PUNASSANDHĀNAPRAYŌGAḤ.

Foll. 32*a*—37*b*.

Similar to the work described under No. 3511 of the D.C.S. MSS., Vol. VII. This pertains to the followers of Āśvalāyana-sūtra.

Complete.

Fol. 38 contains Śāntisūkta. Foll. 39*a*—42*b* contain some Vedic hymns.

R. No. 960.

Palm-leaf. 16½ × 1¼ inches. Foll. 147. Lines, 7 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 1*a*—5*b* contain some stanzas regarding दान and प्रतिग्रह, taken from various Dharmaśāstras.

परशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ : MĀDHAVĪYĀ.

By Mādhavācārya. Same work as that described under No. 2646 of the D.C.S. MSS., Vol. V.

Contains the first two Adhyāyas complete.

R. No. **961.**

Palm-leaf. 16×1¼ inches. Foll. 48. Lines, 7 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) औद्गात्रप्रयोगः.

AUDGĀTRAPRAYŌGAḤ.

Foll. 1*a*—31*b*.

Similar to the work described under No. 1145 of the D.C.S. MSS., Vol. II.

Complete.

(*b*) प्रायणीयातिरात्रः.

PRĀYAṆĪYĀTIRĀTRAḤ.

Foll. 32*a*—39*a*. Foll. 39*b* and 40*a* are left blank.

On the initial ceremony to be performed on the first day of the Sōma sacrifice, called Atirātra.

Complete.

Beginning:

एँ१ब्रु१षु१ २ब्रवाणा१६ इता१ इ ओमम इ्ड्ेतरा गा११ इरा१: ।

End:

सुमनसा नि१य१ २छा१त१०प१ इ वत१९सो१११मा१ इ या१०मा१२था दे४ व१६ हू१ उवा१म् ॥

Colophon:

प्रायणीयातिरात्रः समाप्तः ॥

Fol. 40*b* contains a few lines from Sāmasaṁhitā.

(*c*) प्रवर्ग्यम्.

PRAVARGYAM.

Foll. 41*a*—48*b*. Foll. 44*b* and 48*b* are left blank.

Similar to the above.

Incomplete.

Beginning:

एह्युषु ब्रवाणि ते अग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः । यत्र क्व च.

End:

सूर्यो ज्योतिर्ज्योतिः सूरायाः सूर्यो ज्योतिर्ज्योता१२, ११, २१, १, हं आदे१ सू१ र्यो आ१२३४२ अ.

R. No. **962.**

Palm-leaf. 15 × 1½ inches. Foll. 200. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 76*b* and 154*b* are left blank.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

By Rāmānujācārya. Same work as that described under No. 4943 of the D.C.S. MSS., Vol. X.

Begins in the second Adhyāya and breaks off in the third Pāda of the fourth Adhyāya.

R. No. 963.

Palm-leaf. 16¾ × 1⅜ inches. Foll. 6. Lines, 6 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

अग्निहोत्रप्रयोगः.

AGNIHŌTRAPRAYŌGAḤ.

Similar to the work described under No. 1097 of the D.O.S. MSS., Vol. II.

Complete.

R. No. 964.

Palm-leaf. 15¾ × 1¼ inches. Foll. 52. Lines, 5 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

नागरखण्डः (स्कान्द).

NĀGARAKHAṆḌAḤ (SKĀNDA).

Similar to the work described under No. 2300 of the D.O.S. MSS., Vol. IV, Part I.

Contains Adhyāyas 1 to 23 and 50 to 55 complete and Adhyāya 56 incomplete.

R. No. 965.

Palm-leaf. 17¼ × 1⅝ inches. Foll. 22. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. L. Rāmacandra Śāstri of Maṟṟipālem in the Vizagapatam district.

कृष्णापुष्करमाहात्म्यम्.

KṚṢṆĀPUṢKARAMĀHĀTMYAM.

On the sacredness of a bath taken in the river Kṛṣṇā when the planet Bṛhaspati enters the sign of Kanyā, which occurs once in twelve years. It is believed that on this occasion the waters of all the sacred rivers in the three worlds mingle with the Kṛṣṇā river.

The details of the subjects dealt herein are apparent from the names of the Adhyāyas.

Contains the following nine Adhyāyas complete ; as found in the Skāndapurāṇa.

१. कृष्णास्नानमहिमवर्णनम्.
२. कन्यापुष्करमाहात्म्यवर्णनम्
३. धर्ममार्गप्रशंसा.
४. सालग्रामशिलादानमहिमा.
५. भूदानप्रशंसा.
६. कन्यापुष्करपुराणश्रवणमहिमा.
७. कन्यादानप्रशंसा.
८. गोदानवर्णनम्.
९. दानमहिमानुवर्णनम्.

Beginning:

आरब्धुं नैमिशारण्ये सत्रं द्वादशवार्षिकम् ।
आजग्मुरखिलास्सर्वे मुनयो ब्रह्मवादिनः ॥
वालखिल्यादिऋषयो ये च मासोपवासिनः ।
पक्षप(वा)राशिनः केचिदन्ये वै वायुभोजनाः ॥

* * * *

ऋषयः—

कन्यागते सुराचार्ये कृष्णामाहात्म्यमञ्जसा ।
श्रोतुमिच्छामहे तात वक्तुमर्हसि तत्त्वतः ॥

सूतः—

कन्यागते सुराचाय त्रैलोक्ये यानि सति च ।
तानि सर्वाणि तीर्थानि कृष्णायां प्रविशन्ति हि ॥
तिस्रः कोटच(टचो्ऽ)र्धकोटी च तीर्थानि भुवनत्रये ।
आयान्ति कृष्णवेण्यायां कन्यायुक्ते बृहस्पतौ ॥

End:

आत्मोपघातिनो ये च परेषां ये च घातकाः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
अरण्ये च रणे ये च ये हताः क्षुद्र(ध)या तृषा ॥
भूतप्रेतपिशाचैश्च तेभ्यः पिण्डं ददाम्यहम् ॥

Colophon:

इति श्रीस्कान्दपुराणे ब्रह्मनारदसंवादे कृष्णापुष्करमाहात्म्ये दान-महिमानुवर्णनं नाम नवमोऽध्यायः ॥

व्ययनामवत्सरश्रावणामावास्याभानुवारे प्रथमयामे వెఙ్కటాద్రి नागेश्वरस्वामिना कृष्णापुष्करमाहात्म्याध्यायनवकं संपूर्णं लिखितम् ॥

Fol. 22*b* is left blank.

R. No. 966.

Palm-leaf. $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 98. Lines, 8 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. L. Rāmacandra Śāstri of Maṟṟipālem.

(*a*) आश्वलायनश्रौतसूत्रम्.

ĀŚVALĀYANAŚRAUTASŪTRAM.

Foll. 1*a*—69*b*.

Same work as that described under No. 1029 of the D.C.S. MSS., Vol. II.

Contains the first eight Adhyāyas.

Incomplete.

(*b*) प्रैषाध्यायः.

PRAIṢĀDHYĀYAḤ.

Foll. 70*a*—83*b*.

This work treats of the manner of invoking the gods to be present at an ensuing sacrifice.

Complete.

Beginning:

अग्निर्भूर्ज्योतिर्ज्योतिरग्निः । इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः । सूर्यो ज्योतिर्ज्योतिस्स्वस्सूर्यः । अग्निर्देवेद्धः । अग्निमन्विद्धः । अग्निस्सुषमित् । होता देववृतः । होतामनुवृतः ।

End :

वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यस्सोमेभ्य-स्सोमपेभ्यो ब्रह्मन् वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्योमाह्वय ॥

Colophon :

इति प्रैषाध्यायः समाप्तः ॥

(*c*) कुन्तापशंसनप्रकारः.

KUNTĀPAŚAṀSANAPRAKĀRAḤ.

Foll. 83*b*—94*b*. Foll. 95—97 are left blank. Fol. 98*a* contains Rāvaṇabēṭ and fol. 98*b* Pauṇḍarīkasaṅkalpa.

This gives the manner of repeating the Kuntāpa hymns occurring in the Atharva Vēda, Chapter XX. This manuscript is said to have been copied for Gōḍā Vāsudēva Śāstri by Kūcibotla Rāmakṛṣṇa, the copying having been completed on Sunday, the 5th day of the bright fortnight of the month of Mārgaśira in the year Khara.

Complete.

Beginning :

इदं जना उपश्रुत नराशंसस्तविष्यति । षष्टिं सहस्ता नवतिं चकारम आरुशमेषु दध्महे । उष्ट्रा यस्य प्रवाहणो वधूमन्तो द्विर्दश ।

End :

सर्वे बुर्बुदयाशवोम् ॥

Colophon :

इति कुन्तापशंशनप्रकारः ॥

R. No. **967.**

Palm-leaf. $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 149. Lines, 7 in a page. Telugu. Injured.

Purchased in 1913-14 from M.R.Ry. L. Rāmacandra Śāstri of Maṟṟipālem.

निर्णयामृतम्.
NIRṆAYĀMṚTAM.

Foll. 1*a*–140*a*.

This treatise in Dharma-Śāstra appears to be almost the same as the work of this name described under No. 1579 in the India Office Library Catalogue, pages 491 to 493. There are, however, some additional stanzas in the introduction. The subjects dealt herein are apparent from the titles of the Prakaraṇas given below. The work was composed by Allāḍanātha, son of Siddhalakṣmaṇa, at the instance of Sūryasēna, who reigned at a place called Ēkacakra. The introduction, which gives the genealogy of this king and mentions the names of the works consulted by the author, is extracted below almost in full.

Complete in four Prakaraṇas, namely, तिथिमासकृत्यप्रकरण, श्राद्धप्रकरण, द्रव्यशुद्धिप्रकरण and आशौचप्रकरण.

Beginning:

ज्ञानानन्दमयं देवं (. .) हयग्रीवमुपास्महे ॥
कारणमेकं जगतां वारणमास्येन वारणं विय(प)दाम् ।
किमपि महो महनीयं(प्रत्यूहव्यूह)वारणं वन्दे ॥

* * * *

यैः कृतः स्मृतिमहार्णवपारप्राप्तिहेतुरिह सङ्ग्रहसेतुः ।
तान् नमा(मि मनु)विष्णुयमाद्य(ान्)कालनिर्णयकृतोऽप्यहमाद्यान् ।
जयन्ति भूमाविह चा(रुबाणाः) क्षितीश(श्वरा) विश्रुतचारुबाणाः ।
प्रकुर्वते ये विशदा यशोभिर्जगत्समग्रं च यदायशोभि[ः] ॥
बभूव भूपस्त्रिदशैः सरूपस्तदन्ववाये बलवान् सरूपः ।
चकार निष्कं(त्यं)च समाहितानां (परिश्रमं) यः परमाहितानाम् ॥
तस्यात्मजन्माजनि कर्णदेवस्त्यागेन यो विश्रुतकर्णदेवः ।
वपुश्श्रिया निर्जितकामदेवः सदा समाराधितवामदेवः ॥

[भिद्धानुमहा)नुभावः ।
तदात्मभूरुद्धरणक्षितीन्द्रै(न्द्रः) कृती . . . द्रकृता(क्षितीन्द्र-
शुभावदातायतकीर्तिरार्तिहरः स्तुतिं(सतां) श्रीपतिमूर्तिरासीत् ॥
स्वकीर्तिवल्लीप्रभवाबाला(तिवल्ली)स्थलीव डिल्ली नगरीमतल्ली ।
भल्लीशतप्रोतशकेशकुम्भीकुम्भाश्च नीरैः समसिञ्चि येन ॥
(सु)व्यक्तमामुक्तमहेभकुम्भमुक्ताप्यमुक्तागणयोवशक्ता ।
रक्तासवः संयति येन काली व्यापीडविश्वाप्यभितर्प्यते स्म ॥
उद्धरणं शुद्धरणं मुद्धरणं विद्विषां समुद्धरणम् ।
सुहृदां पु(रातन)हृदां नमतितमां को न नाम (तत)नामः ॥
सौन्दर्येण विकुण्ठितो रतिपतिः शौर्येण च श्रीपति-
र्गाम्भीर्येण सरित्पति[नि]र्विल(स)ता धैर्येण भूभृत्पतिः ।
सत्कान्त्योडुपतिः श्रिया धनपतिर्यस्तेजसाहर्पति-
स्तेना(र्योद्धरणेश्व)रेण सुमतिः स्पर्धेत कः क्ष्मापतिः ॥
आशावशावाहितसत्प्रतापः स्वसुर्निवेशोदितरस्यदेशम् ।
[मेकचक्रम् ॥
अध्यास्त वृध्यास्तमनश्च(समस्त)शक्रास्पदं पुरस्ता(रं सा)दर-
राजितं यत्पुरं रम्यं राजमण्डलम(ण्डितम्) ।
कमलोल्लासिमद्रत्नं रत्नाकरविभूतिमत् ॥
लस . . लास्थिाशिञ्जन्नूपुरं भाति यत्पुरम् ।
पुरं पुरंक(द)रस्येव भूरिसुन्दरमन्दिरम् ॥
यस्योपकण्ठे शितिकण्ठकण्ठस्पार्धिप्रभा भा(नुसुता) वहन्ती ।
तदुच्चवेदध्वनिसांनिकर्षादभ्य(स्य)तीवाखिलपावनित्वम् ॥
यत्रानिशं सत्रकृतः पवित्राः सता(दा)स्वगोत्रैर्ग्रहिणो वसन्ति ।
यद्धोमधूमः कुरुतेऽतिभूमायन्नादनैर्मेदुरमन्तरिक्षम् ॥

यत्सौधजालेषु निविश्य रात्रौ तद्वासधूपैः पृथुवि(ली)कृताङ्गाः ।
निर्याणनिर्यत्नतया भजन्ते नीलाम्बुदा नीलशिलाविलासम् ॥
यदुच्चसौधध्व(ज)जालचेलजातानिलैर्हेलिहचा(याः)सलीलम् ।
. . . . तमितः श्रयन्तः कुतोऽपि न श्रान्तिमवाप्नुवन्ति ॥
व्यजेषि भूलोकपुरी(री) सुराणां पुरीं व्यजेषि ध्वजदण्डघातैः ।
[प्रतिबिम्बदम्भात् ॥
जैष्ये(जेष्या)मि पातालमिति स्रवन्ती(न्तीं) विपाङ्भिदं (यत)
प्र . . . . . चकाशं मान्यं वदान्यान्वयमत्र वीक्ष्य ।
बृन्दारकाणां त्रिदिवोऽपि बृन्दमन्दारकाणां वसतिर्धि(र्वि)गीता ॥
पुरं शशासैष पुरन्दराभस्तदेकचक्राख्यमनेकचक्रः ।
असंख्यसंख्यारिजयोर्जिताख्याह्व(यश्च येनोद्धरण)क्षितीशः ॥
समुद्रैरजय(त) सप्तसमुद्रैर्मण्डितां महीम् ।
पालयंस्तन्महीपालः पुरालंकुरुते पुरम् ॥
गुणरत्नाकरे चन्द्रश्चन्द्रसेनस्तनोभवे(तोऽभव)त् ।
तस्यात्मजन्मा चरिता(र्थजन्मा) श्रीसूर्यसेनो जयति क्षितीन्द्रः ।
सुदर्शनेनैव बिभर्ति गोपीनारायणत्वं भुवि यः प्रसिद्धम् ॥

*　　*　　*　　*

चकास्ति तस्यातिरत(तर)प्रतापः (प्रतापसे)नोऽवरजः प्रसिद्धः ।
भक्त्याभिरामस्य सदाग्रजस्य यो लक्ष्मणाकारमुपैति भर्त्य(द्रम्) ॥
औदार्यसौन्दर्यक्ष(द)यास(न)याज्ञाविज्ञानशौर्यादिगुणेषु नान्यम् ।
प्रतापसेनस्य समं समन्ताल्लोके विलोकेऽत्र (विचि)त्रलोके ॥
श्रीदेवसेनस्तनयोऽपि गोपीनारायणस्याजनि कामरूपः ।
लब्धप्रसादेन महेश्वरस्य रामारतिस्तुष्टिमुपैति यत्र ॥
देवसेनकुमारस्य कुमारस्य च नान्तरम् ।
आर्यानन्दकृतो नित्यं बिभ्रतः शक्तिमुत्तमाम् ॥

श्रीसूर्यसेनः पुरमेकचक्रं वराङ्गमध्यास्य जयत्यजस्रम् ।
ममत्य(यमेक)कान्तं जितनाश(क)कान्तं गुर्वीयमुर्वी विशदोर्वरास्ते ॥
विद्वत्सु सत्स्वपि महत्सु समाश्रितेषु
श्रीसिद्ध(लक्ष्म)णसुतः सुतराममुष्य ।
श्रीसूर्यसेननृपतेः शुप(भ)तेजसोऽभूद-
ल्लाडिनाथमतिमानतिमानपात्रम् ॥
एनं कदापि सुमतिर्नृपतिः स्वनाम्ना
श्रौतादिकर्मसु स कालविनिर्णयाय ।
आदिक्षदेष (वचसा निशितास्त्र)जात-
शस्त्राहताहितशतः शतमन्युकल्पः ॥
अगाधग्रन्थपाथोधिमथालोड्य यथा धिया ।
समुद्धृतं नृपादेशात्तेनेदं निर्णयामृतम् ॥
मनुस्मृतिं विष्णुपराशरादया(प)-
स्तम्बस्मृतिं वीक्ष्य मिताक्षरां च ।
तथापरार्कार्णवपारिजात-
स्मृत्यर्थसारं स्मृतिचन्द्रिकां यां (च) ॥
मात्स्यं कौर्मं च वाराहं दृष्ट्वा वैष्णववामने ।
मार्कण्डेयपुराणानि भविष्योत्तरभारते ॥
परिशिष्टं हेमाद्रेरनन्तभट्टीयगृह्यपरिशिष्टे ।
कालादर्शं चिन्तामणित्रिदण्डी च कृत्यकल्पतरुम् ।
धवलपुराणसमुच्चयदुर्गोत्सवरामकौतुकानि तथा ।
संवत्सरप्रदीपं सभोजराजीयदैवदासीयम् ॥
रूपनारायणीयं विद्याभट्टपद्धतिं वितताम् ।
वीक्ष्य महादेवीयं शुभं निबन्धं च विश्वरूपकृतम् ॥

श्रीसूर्यसेननृपतेरादेशात्सिद्धलक्ष्मणतनूजः ।
अल्लाडनाथसूरिः संग्रहमिह कालनिर्णये कृतवान् ॥

इति ग्रन्थावतारानुक्रमणिका ॥

ग्रन्थे श्रीसूर्यसेनस्य निर्णयामृतसंज्ञके ।
आदावस्मिन्नुदाहारः कथितः प्रथितः क्रमः ॥
एकभुक्तादिकानां तु व्रतानां तदनन्तरम् ।

End:

अनारब्धविशुद्ध्यर्थं कूश्माण्डैर्जुहुयाद् घृतम् ।
गा दद्यात् पञ्चगव्याशी ततः शुध्यति सूतकी ॥

अस्य श्रीबहिर्मातृकासरस्वतीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, बहिर्मातृका सरस्वती देवता, हलो बीजानि, स्वराश्शक्तः, बिन्दवः कीलकं, श्रीमदिष्टदेवताप्रसादसिध्यर्थं बहिर्मातृकान्यासपारायणे विनियोगः।

End:

क्षं नमः जठरादिब्रह्मरन्ध्रपर्यन्तं न्यसेत् ॥

Colophon:

इति बहिर्मातृका(मन्त्र): समाप्तः ॥

Foll. 79 and 80. contain some lines from the Mātaṅgīstōtra.

R. No. **1248.**

Palm-leaf. $16\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 19. Lines, 8 in a page. Telugu. Much injured.

Presented in 1913–14 by M.R.Ry. K. Rāmakṛṣṇayya of Masulipatam.

(*a*) **सामुद्रिकलक्षणम्.**

SĀMUDRIKALAKṢAṆAM.

Foll. 1*a*—8*b*.

Deals with the characteristics and fortunes of men and women as may be divined from the nature of the marks found in their bodies.

Seems incomplete.

Beginning:

आदिदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शनम् ।
सामुद्रिकं प्रवक्ष्यामि पुंसां स्त्रीलक्षणं शुभम् ॥

सामुद्रिवचनं श्रुत्वा नारदं परिपृच्छसि ।
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ॥

आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ।
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ॥

End :

एकचक्री महाभोगी द्विचक्री राजपूजितः ।
त्रिचक्री च दरिद्रस्स्याच्चतुश्चक्रेण पण्डितः ॥

* * * *

कृशोर(द)री निम्ना नाभिर्मांसलोष्ठमृदुहस्ता शुभप्रदा ॥

(*b*) **नक्षत्रजातफलगुणानिरूपणम्.**

NAKṢATRAJĀTAPHALAGUṆANIRŪPAṆAM.

Foll. 9*a*—19*a* Fol. 19*b* is left blank.

Slightly different from the work described under R.No. 371(j) *ante*.

Incomplete.

Beginning :

रूपवान् गुणवान् र(द)क्षो महि(ति)मान् भूषणप्रियः ।
शूरः स्त्रीलोलुपो मानी दस्रभे जायते नरः ॥ २१ ॥
आरोगी शुभवान् भोगी सत्यवादी रतिप्रियः ।
जाते(तो)यमर्क्ष(र्क्षे)मनुजा(जो)लघुभुग्बुद्धिमान् भवेत् ॥

End :

अंशगुणाः प्रथमपादस्य रविः नृपांशः तत्फलं तेजस्विनिः(स्वी) स्थूलः द्वितीयपादस्य बुधः नपुंसकांशः । उत्साहः शास्त्रज्ञः सुखः । तृतीयपादस्य शुक्रः अभयांशः गुणवान् शीलज्ञः सुशीलः चतुर्थपादस्य कुजः शठांशः क्रूरः स्थूलकायः अस्मिन् जातस्य अङ्गारकमहादशाः सप्त वर्षाः अन्तर्दशा चतुर्मासाः सप्तविंशतिदिनानि दशदिने अष्टादशदिने गण्डान्तः पञ्चवर्षे ज्वरभयं षष्ठे वर्षे अष्टादशे वर्षे ज्वराग्नि.

R No. **1249.**

Palm-leaf. 14⅝ × 1¼ inches. Foll. 30. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

तैत्तिरियोपनिषद्.

TAITTIRĪYŌPANIṢAD.

Same work as that described under No. 486 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Praśna incomplete.

R. No. **1250.**

Palm-leaf. 14 × 1¼ inches. Foll. 80. Lines, 5 in a page. Telugu. Much injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ.

Same work as that described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains Praśnas 1, 2, 4, 5 and 6 in the second Kāṇḍa, the 6th Praśna being incomplete.

R. No. **1251.**

Palm-leaf. 11½ × 1½ inches. Foll. 31. Lines, 9 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAḤ WITH COMMENTARY.

Same work as that described under No. 11121 of the D.C.S. MSS., Vol XIX.

Breaks off in the commentary on the stanza relating to Phala-śruti.

Foll. 14*b* and 31*a* are left blank.

R. No. 1252.

Palm-leaf. 16¼ × 1⅝ inches. Foll. 170. Lines, 6 in a page. Telugu. Fair.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

The first three foll. are left blank.

आपस्तम्बधर्मसूत्रवृत्तिः—उज्ज्वला.

ĀPASTAMBADHARMASŪTRAVṚTTIḤ : UJJVALĀ.

Foll. 4*a*—169*a*. Fol. 169*b* and 170 are left blank.

Complete.

By Haradattācārya. Same work as that described under No. 1220 of the D.C.S. MSS., Vol. II.

R. No. 1253.

Palm-leaf. 18 × 1½ inches. Foll. 194. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

नामलिङ्गानुशासनपदविवरणम्.

NĀMALIṄGĀNUŚĀSANAPADAVIVARAṆAM.

Contains the Puravarga to Strīpuṁsādhikāra.

The synonymous words as found in the order given in the Nāmaliṅgānuśāsana of Amarasiṁha followed by their meaning in Telugu.

R. No. 1254.

Palm-leaf. 10½ × 1½ inches. Foll. 16. Lines, 8 in a page. Telugu. Much injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) विष्णुसहस्रनामस्तोत्रम्.

VIṢṆUSAHASRANĀMASTŌTRAM.

Foll. 1*a*—7*b*.

Same work as that described under No. 9017 of the D.C.S. MSS., Vol. XVII.

Complete.

(*b*) ईशावास्योपनिषद्.

ĪŚĀVĀSYŌPANIṢAD.

Foll. 8*a*—9*a*.

Same work as that described under No. 300 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) कैवल्योपनिषद्.

KAIVALYŌPANIṢAD.

Foll. 9*a*—11*a*. Fol. 11*b* is left blank.

Same work as that described under No. 395 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) विष्णुसहस्रनामावलिः.

VIṢṆUSAHASRANĀMĀVALIḤ.

Foll. 12*a*—16*b*.

Same work as that described under No. 9038 of the D.C.S. MSS., Vol. XVII.

Incomplete.

R. No. **1255.**

Palm-leaf. $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 127. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

Foll. 22*a* and 127*b* are left blank.

कृष्णयजुर्वेदसंहिताभाष्यम्.

KṚṢṆAYAJURVĒDASAṀHITĀBHĀṢYAM.

Same work as that described under No. 111 of the D.C.S. MSS., Vol. I, Part II.

Contains the commentary of Mādhavācārya on the seventh Kāṇḍa complete.

R. No. 1256.

Palm-leaf. 17¾ × 1⅝ inches. Foll. 373. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

कृष्णयजुर्वेदसंहिताभाष्यम्.

KṚṢṆAYAJURVĒDASAṀHITĀBHĀṢYAM.

Same work as the above.

Contains the commentary of Mādhavācārya on the first Kāṇḍa from the first Praśna to the end of the fourth Anuvāka of the sixth Praśna.

R. No. 1257.

Palm-leaf. 16¼ × 1½ inches. Foll. 295. Lines, 8 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry Jaganmōhana Rao of Masulipatam.

कृष्णयजुर्वेदसंहिताभाष्यम्.

KṚṢṆAYAJURVĒDASAṀHITĀBHĀṢYAM.

By Mādhavācārya. Same work as that described under No. 106 of the D.C.S. MSS., Vol. I, Part II.

Contains from the fifth Anuvāka of the sixth Praśna in the first Kāṇḍa to the end of the eighth Praśna of the same Kāṇḍa and the third Kāṇḍa complete.

This manuscript is said to have been copied by Maṅgaḻagiri Gaṅgayya for Śrī Cāgaṇṭi Vīrajanārdana Sōmayāji, the copying having been completed on Thursday, the 9th day of the bright fortnight of the month of Mārgaśira in the year Plavaṅga.

Foll. 167 and 168 are left blank.

R. No. 1258.

Palm-leaf. 14 × 1¼ inches. Foll. 102. Lines, 6 in a page. Telugu. Very much injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHĀṢYAM.

By Sāyaṇācārya. Same work as that described under No. 129 of the D.C.S. MSS., Vol. I, Part II.

Contains the Namaka.

Beginning:

नमस्ते . . इषवे नमः। अस्य श्रीरुद्रसमुदायमहामन्त्रस्य रुद्र ऋषिः महाविराट् छन्दः सदाशिवो देवता।

* * * *

रोदयति सर्वमन्तकाल इति रुद्रः। हे रुद्र शिव ते तव स्वभूताय मन्यवे क्रोधाय नमः।

End:

ददामि स्थापयामि। युष्मद्दन्तेषु स्थापयामि।

* * * *

अस्य पुरश्चरणादिकमत्र लिख्यते॥

R. No. 1259.

Palm-leaf. 16¾ × 1¼ inches. Foll. 255. Lines, 6 in a page. Telugu. Very much injured.

Presented in 1913–14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

The commentary is by Śrīdharasvāmin.

Same work as that described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I.

Contains the fourth and the fifth Skandhas.

R. No. **1260.**

Palm-leaf. 17 × 1¼ inches. Foll. 252. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

नामलिङ्गानुशासनम्—अमरकोशपदविवृतिसहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH AMARAKŌŚAPADAVIVṚTI.

By Liṅgayasūri. Same work as that described under No. 1697 of the D.C.S. MSS., Vol. III.

Complete.

R. No. **1261.**

Palm-leaf. 11 × 1¼ inches. Foll. 33. Lines, 5 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) महान्यासः.

MAHĀNYĀSAḤ.

Foll. 1*a*—13*a*.

Similar to the work described under No. 3751 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः—

ओं नमस्ते रुद्र मन्यवे . . . रुद्र मृडय ओं अं कं खं गं घं ङं ओं नमो भगवते रुद्राय पूर्वाङ्गरुद्राय नमः । यो रुद्रो अग्नौ—तस्मै रुद्राय नमो अस्तु ओं इं चं छं जं झं ञं ओं नमो भगवते रुद्राय ।

End:

एवं रुद्रविधानं दश गास्सवत्साः आचार्याय दक्षिणां दद्यात् । तदभाव एकां गां दद्यादेवं कुर्वन्नश्वमेधफलमवाप्नोतीत्याह भगवान् बोधायनः ॥

Fol. 13 contains a few lines of Rudrapraśna with Nyāsa, etc.

(*b*) महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Foll. 14*a*—15*b*.

Same work as that described under No. 11121 of the D.C.S. MSS., Vol. XIX.

Contains the fifteenth stanza complete and the sixteenth incomplete.

(*c*) विष्णुसहस्रनामस्तोत्रम्.

VIṢṆUSAHASRANĀMASTŌTRAM.

Foll. 16*a*—30*b*.

Same work as that described under No. 9017 of the D.C.S. MSS., Vol. XVII.

Complete.

Foll. 31*a*—33*b* contain a few lines of Śamānasandhi, etc.

R. No. **1262.**

Palm-leaf. 16 × 1⅜ inches. Foll. 334. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) पितृमेधसारप्रश्नव्याख्यानम्—सुधीविलोचनम्.

PITṚMĒDHASĀRAPRAŚNAVYĀKHYĀNAM: SUDHĪVILŌCANAM.

Foll. 1*a*—223*a*. Fol. 223*b* is left blank.

By Vaidikasārvabhauma. Same work as that described under No. 1241 of the D.C.S. MSS., Vol. II.

Complete.

This manuscript is said to have been copied by Maṅgaḷagiri Vēṅkaṭakṛṣṇānandar for Cāganṭu Vīrajanārdana Sōmayājulu on Thursday, the full moon day of the Śrāvaṇa month in the year Parābhava.

(b) कृष्णयजुर्वेदमन्त्रप्रश्नभाष्यम्.

KṚṢṆAYAJURVĒDAMANTRAPRAŚNABHĀṢYAM.

Foll. 224*a*—279*b*.

By Haradattācārya. Same work as that described under No. 242 of the D.C.S. MSS., Vol. I, Part II.

Complete.

The copying is said to have been completed by Maddūri Tripurāntakan on the 1st day of the bright fortnight of the Śrāvaṇa month in the year Parābhava.

(c) भारद्वाजपितृमेधसूत्रम्.

BHĀRADVĀJAPITṚMĒDHASŪTRAM.

Foll. 280*a*—295*b*.

Same work as that described under No. 1234 of the D.C.S. MSS., Vol. II.

Complete.

This manuscript is said to have been copied by Maṅgaḷagiri Vēṅkaṭakṛṣṇānandar for Cāganṭu Vīrajanārdana Sōmayājulu on Friday, the 5th day of the Śrāvaṇa month in the year Parābhava.

Fol. 296 contains a few lines regarding पुनः सपिण्डीकरणविधि. Foll. 296*b*—297*a* give some Dharmaśāstra passages on शिशुसंस्कार. Foll. 297 and 298 give some Dharmaśāstra passages on अनुमृतसंस्कार. Foll. 298 and 299 give some passages on अग्न्युत्पत्तिनिर्णय.

(*d*) त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Foll. 299*b*—300*b*.

Same work as that described under No. 6352 of the D.C.S. MSS., Vol XIII.

Complete.

Fol. 301*a* gives some passages regarding the duty of प्रेतभार्या, रजस्वला चेत्.

(*e*) तटाकप्रतिष्ठाविधिः.

TAṬĀKAPRATIṢṬHĀVIDHIḤ.

Foll. 301*b*—304*b*.

Similar to the work described under No. 5763 of the D.C.S. MSS., Vol. XII.

Complete.

Beginning:

युधिष्ठिरः—तटाकप्रतिष्ठाविधिं व्याख्यास्यामः । सर्वजन्तूनां सर्वप्राणिनां रक्षणार्थं चतुष्पथ . . . . महातटाकं खात्वा . . . . तटाकोपरि महापाषाणादिकं सोपानानि कृत्वा तटाकस्य प्राग्भागे हस्तमात्रं चतुरश्रां वेदिकां कृत्वा

* * * *

तदङ्गत्वेन विनायकपूजां पुण्याहं च कुर्यात् ।

End:

हेमन्ते तु प्रतिष्ठाय वाजपेयशतं फलम् ।
शैशिरे तु प्रतिष्ठाय अतिरात्रसमं फलम् ॥

Colophon:

इति . . . पुराणे यमनिर्मलसंवादे तटाकप्रतिष्ठा संपूर्णा ॥

Foll. 304*b* to 306*b* contain some passages on विवाहयोग्यनिर्णय, शिवरात्रिव्रत, ग्रहणनिर्णय, संक्रान्तिनिर्णय.

(*f*) समानप्रवरनिर्णयः.

SAMĀNAPRAVARANIRṆAYAḤ.

Foll. 306*b*—311*b*.

A treatise explaining what is meant by having the same Pravara and setting forth the prohibited degrees of relationship in connection with marriage.

Seems complete.

Beginning :

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्यत्राङ्गिरसो भृगोः ॥
जमदग्निर्वीतहव्यो वैश्यो गृत्समदाह्वयः ।
वाध्र्यश्वो गौतमाख्यश्च भारद्वाजाह्वयः कपिः ॥

End :

कन्यासोदरजन्याभ्यामेकमातृप्रसूतयोः ।
नैव पाणिग्रहः कार्यः कन्ययोरेकजन्ययोः ॥
सोदरावेकजातौ वा भगिनीभ्रातृकन्ययोः ।
पाणिग्रहणमात्रेण भगिनीगमनागसौ ॥

(*g*) मृत्युंजयस्तोत्रम्.

MṚTYUÑJAYASTŌTRAM.

Fol. 312.

By Śaṅkarācārya. Same work as that described under No. 11135 of the D.C.S. MSS., Vol. XIX.

Contains ten stanzas.

Foll. 312*b* and 313*a* contain some Dharmasastric passages on ग्रहणश्राद्धनिर्णय.

Fol. 313*b* is left blank.

(*h*) दत्तमीमांसा.

DATTAMĪMĀṀSĀ.

Foll. 314*a*—320*b*.

A treatise on the Hindu law of adoption. Similar to the work described under No. 3161 of the D.C.S. MSS., Vol. VI.

Complete.

Beginning :

स्मृतिचन्द्रिकायां दत्तपुत्रनिर्णयः । त्रयोदशपुत्राणां स्वरूपमुक्तं मनुना—

औरसः पुत्रिकाबीजः क्षेत्रजापुत्रिकासुतः ।
पौनर्भवश्च कानीनः सहोधो गूढसंभवः ॥

End :

नारदोऽपि—

अपुत्राणां तु सर्वेषामन्यपुत्रपरिग्रहात् ।
दम्पत्योर्भ्रातृजो मुख्यः सपिण्डोऽपि सगोत्रजः ॥
अभावे त्वन्यगोत्रीयो ग्राह्य एव सुतः क्वचित् ।
परं तु पञ्चमादब्दो ग्राह्यो न संभवः ॥

Colophon :

श्रीमद्विश्वंभराभरणनिपुणपयःपारावारमध्यस्थसहृषण(?)मणिच्छविविराजश्रीदत्तमीमांसा समाप्ता ॥

(*i*) आशौचदशश्लोकी.

ĀŚAUCADAŚAŚLŌKĪ.

Foll. 320*b*—321*b*.

Same work as that described under No. 3023 of the D.C.S. MSS., Vol. V.

Complete.

(*j*) आशौचदशश्लोकी—सव्याख्या.

ĀŚAUCADAŚAŚLŌKĪ WITH COMMENTARY.

Foll. 321*b*—334*b*.

Ten stanzas dealing with different kinds of pollution arising chiefly from birth or death among one's relations.

Complete.

Beginning:

मातुर्गर्भविपत्स्वघं त्रिदिवसं मासत्रयेऽतो यथा-
मासाघं त्रिषु सूतिकाविधिरतः स्नानं पितुः सर्वदा ।
ज्ञातीनां वपनादिजातमरणे पित्रोर्दशाहं सदा
नाम्ना प्राक्तदुपैति सूतकवशाद्भ्रातुर्दशाहं परम् ॥
मातृगर्भत्रयोगर्भविपदो गर्भनाशकाः ।

स्रावपातः प्रसवात्मिका । स्मृत्यन्तरे—

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं तु नारीणामतः प्रसव उच्यते ॥

तासु मातुरेवाघं भवतीत्यर्थः ।

End:

व्यासः—

सर्वेषामेव लोकानां गुरुर्नारायणो बलिः ।
तस्य . . . . पापहरं हि तत् ॥

R. No. **1263.**

Palm-leaf. 16½ × 1⅜ inches. Foll. 36. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913-14 from M R.Ry. Jaganmōhana Rao of Masulipatam.

स्मृतिकदम्बकम्.
SMṚTIKADAMBAKAM.

A digest of several original works on Smṛti by Kañcam Yallaya-sūri of Śrīvatsa-gōtra, son of Nārayārya. From a few stanzas found at the end after the colophon, it is made out that the author has written seven other works, viz., (1) Kātyāyanagṛhyasūtrasaraṇi,

(2) Jyautiṣadarpaṇa, (3) Bālaprabōdha, (4) Daivajñavilāsa, (5) Kārikākadamba, (6) Gaṇakadarpaṇa and (7) Sarvatōbhadra.

Contains the Aparaprayōgavidhi, the Āśaucanirṇaya and the Ācārakāṇḍa.

Beginning :

कात्यायनः—

नव श्राद्धानि सर्वाणि प्रेततृप्तिकराणि च ।
मासिकानि तु सर्वाणि प्रेतत्वस्य विमुक्तये ॥
सपिण्डीकरणश्राद्धं पितृत्वप्राप्तये सुतः ॥
पितुः कुर्यादुक्तकाले प्रेतत्वस्य विमुक्तये ।

गालवः—

सपिण्डीकरणं कुर्यात् ततः प्रेतत्वमुक्तये ।
विश्वान् देवान् नियुज्यादौ क्रतुदक्षाख्यसंज्ञिकान् ॥
कालकामुकसंज्ञौ च केचिदिच्छन्ति सूरयः ।
पितामहादिभिः प्रेतं यत्नात्सम्यग्विमिश्रयेत् ॥

End :

मार्जनीसमुद्भूतं रजः स्पृष्टं चेदश्रीकरमनायुष्यमपुण्यं च । वस्त्रकेशपटोदकमनायुष्यमपुण्यं च शूद्रवस्त्रवायुरनायुष्यमपुण्यं च देहशुद्ध्यर्थं सर्वपापनुत्यर्थं तत्र तत्र प्रायश्चित्तानि कार्याणि ।

इदं स्मृतिकद(म्बं) तु श्रुतिस्मृतिविदा कृतम् ।
नारयार्यतनूजेन का(क)च्चं म(य)ल्लयसूरिणा ॥
आचार्य(र)काण्डस्तत्रादौ साङ्ग एव निरूपितः ।

अथ सर्वप्रा(य)श्चित्तकाण्डस्सम्यङ्निरूप्यते—

शोधयन्तु प्रबन्धं मे गुणदोषौ विपश्चितः ।
हंसानामधिकारादौ क्षीरनीरविवेचने ॥

Colophon :

इति कश्चं यल्लुभट्टविरचिते स्मृतिकदम्बे आचारकाण्डस्समाप्तः ॥

श्रीवत्सान्वयकश्चयल्लधरणीदेवोत्तमो धीनिधिः
श्रीकात्यायनगृह्यसूत्रसरणीं चादौ मुदा निर्ममे ।
शास्त्रं ज्यौतिषदर्पणाख्यममलं बालप्रबोधाह्वयं
तद्दैवज्ञविलासमित्यभिनवग्रन्थत्रयं चाकरोत् ॥
कारिकाणां कदम्बं तत्प्रयोगं काण्वशाखिनाम् ।
ततः स्मृतिकदम्बाख्यं लसद्गुणकदर्पणम् ॥
विमलं सर्वतोभद्रमेवं ग्रन्थाष्टकं महत् ।
इतोऽपि ग्रन्थनिर्माणशक्तिर्भूयादनेकधा ॥
भानोः प्रसादान्महवेद(ताम)नुग्रहविशेषतः ।

Fol. 36*b* is left blank.

R. No. **1264.**

Palm-leaf. 16⅓ × 1⅓ inches. Foll. 57. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Jaganmōhana Rao of Masulipatam.

(*a*) तैत्तिरीयोपनिषद्व्याख्या—लघुदीपिका.

TAITTIRĪYŌPANIṢADVYĀKHYĀ : LAGHUDĪPIKĀ.

Foll. 1*a*—27*b*.

By Vidyāraṇya. Same work as that described under No. 515 of the D.C.S. MSS., Vol. I, Part III.

This manuscript is said to have been copied by Guḍivāṭi Bhāvirāju for Bucci Kāmappa, son of Bhamiḍivāṭi Ayyappagār, the copying having been completed on Saturday, the 13th day of the dark fortnight of the Jyēṣṭha month in the year Prabhava.

Contains the Brahmavallī and Bhṛguvallī complete.

(*b*) सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Foll. 28*a*—30*a*. Fol. 30*b* is left blank.

Same work as that described under No. 10850 of the D.C.S. MSS., Vol. XIX.

Contains 39 stanzas only.

(*c*) तैत्तिरीयोपनिषद्दीपिका.

TAITTIRĪYŌPANIṢADDĪPIKĀ.

Foll 31*a*—57*b*.

By Śaṅkarānanda. Same work as that described under No. 511 of the D.C.S. MSS., Vol. I, Part III.

Breaks off in the Sāṁhityupaniṣad, *i.e.*, Śikṣāvallī.

R. No. 1265.

Palm-leaf. $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 105. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. K.R.V. Kṛṣṇa Rao Bahadur of Cocanada.

(*a*) पञ्चदशी.

PAÑCADAŚĪ.

Foll. 1*a*—60*b*. Fol. 60*b* is left blank.

By Vidyāraṇya. Same work as that described under No. 4613 of the D.C.S. MSS., Vol. IX.

Contains from the beginning of Citradīpa to the end of Viṣayānanda.

Said to have been copied by Kōṭāru Viyaṇṇa for Rāja Kandimallarāya on Monday, the 7th day of the bright fortnight of the Āṣāḍha month in the year Raktākṣi.

(*b*) हरिमीडेस्तोत्रम्—सव्याख्यानम्.

HARIMĪḌĒSTŌTRAM WITH COMMENTARY.

Foll. 61*a*—105*b*.

By Svayamprakāśayati. Same work as that described under No. 10476 of the D.C.S. MSS., Vol. XVIII.

Complete.

Copying was made by the same scribe for the use of the same person as above, the copying having been completed on Thursday, the 3rd day of the bright fortnight of the Phālguna month in the year Raktākṣi.

Beginning:

वाचा यया श्रुतिवचांसि च भेदवादिकौलेयकैर्मलिनितानि विशोधितानि ।
तस्यामशूशुचमहं वचनं मदीयं संमिश्य शङ्करगुरोर्विबुधाः क्षमन्ताम् ॥
यस्याक्षिपातपदवीं सकृदप्यवाप्य भूयो न संसृतिकमार्गमवाप्नुवन्ति ।
लोकास्तमात्मसुखमग्नमनःप्रचारं कैवल्ययोगिगुरुमाभजतां मनो मे ॥
इन्दीवरेन्द्रमणिसुन्दरमिन्दिरेशं मन्दीकृतेन्द्ररिपुबृन्दममन्दवीर्यम् ।
मन्दस्मितप्रसरनन्दितलोकबृन्दं वन्दे दिनेन्द्रकुलनन्दनरामचन्द्रम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवल्यानन्दयोगीन्द्रपादकमल-भृङ्गायमाणस्वयम्प्रकाशाख्ययतिविरचिता श्रीशङ्करभगवत्पूज्यपादकृतहरिस्तुतिव्याख्या हरितत्त्वमुक्तावलीसमाख्या समाप्ता ॥

R. No. **1266.**

Palm-leaf. 17 × 1⅜ inches. Foll. 62. Lines, 7 in a page. Telugu. Much injured.

Presented in 1913–14 by M.R.Ry. Rāmacandra Rao of Samalkot.

(*a*) उत्तरगीता—आन्ध्रटीकासहिता.

UTTARAGĪTĀ WITH TELUGU MEANING.

Foll. 1*a*—26*b*.

Same text as that described under No. 2372 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

Copying is said to have been made by one Sītārāma Cīnayya.

(*b*) उत्तरगीता—सव्याख्या.

UTTARAGĪTĀ WITH COMMENTARY.

Foll. 27*a*—62*b*.

The commentary is by Gauḍapādācārya. Same work as that described under No. 2379 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

R. No. **1267**.

Palm-leaf. $18\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 52. Lines, 8 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. Rāmacandra Rao of Śāmalkōṭa.

ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: BHĀṢYA-RATNAPRABHĀ.

By Gōvindānanda. Same work as that described under No. 4679 of the D.C.S. MSS., Vol. IX.

Contains the third Adhyāya only complete.

R. No. **1268**.

Palm-leaf. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 35. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Rāmacandra Rao of Śāmalkōṭa.

कृष्णयजुर्वेदारण्यकम्.

KṚṢṆAYAJURVĒDĀRAṆYAKAM.

Same work as that described under No. 169 of the D.C.S. MSS., Vol. I, Part II.

Contains the Praśnas 3, 5 and 6 only complete.

The transcription of this manuscript is said to have been completed on Friday, the 3rd day of the dark fortnight of the Jyēṣṭha month in the year Viḷambi.

R. No. **1269.**

Palm-leaf. 11 × $1\frac{3}{8}$ inches. Foll. 27. Lines, 5 in a page. Telugu. Injured.

Presented in 1913-14 by M.R.Ry. Rāmacandra Rao of Śāmalkōṭa.

(*a*) देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Foll. 1*a*—15*a*.

Same work as that described under No. 2444 of the D.C.S. MSS., Vol. IV, Part II.

Contains Adhyāyas 13 to 20 only.

(*b*) आद्यलक्ष्मीपूजाविधानम्.

ĀDYALAKṢMĪPŪJĀVIDHĀNAM.

Foll. 15*a*—17*a*.

On the conduct of the worship of the goddess Ādilakṣmī who is considered to be the same as Dēvī.

Complete.

Beginning:

ओं नमश्चण्डिकायै इति.

श्रीचण्डिकासप्तशतिकाव्यचरितस्य गायत्री छन्दः, ब्रह्मा ऋषिः, महालक्ष्मीर्देवता, उष्णिक् छन्दः.

* * * *

अथ पूजाविधिः—

मन्त्रोद्धारविधिरुच्यते ।

त्रिकोणषट्कोणवृत्ताष्टदलाग्रग्रन्थित्रिशृङ्गकतद्बाह्यवृत्तचतुष्कोणमण्डल- . . . . त्रिकोणमध्ये मायाबीजं विलिखेत् ।

End:

षट्कोणबाह्ये वामे ओं ह्रूं कालमृत्यवे नमः । ततः देव्याः षोडशोपचारान् कुर्यात् ॥

Colophon:

इत्याद्यलक्ष्मीपूजाविधिस्समाप्तः ॥

(c) व्यासपुत्राष्टकम्.

VYĀSAPUTRĀṢṬAKAM.

Foll. 17a—18b. Fol. 21 contains a few lines relating to Navākṣarīmantrabhāga.

Same work as that described under R. No. 1229 (*f*) *ante.*

Complete.

(d) ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Foll. 18b—20b.

Same work as that described under R. No. 610 (*b*) *ante.*

Incomplete.

(e) पञ्चदशाक्षरीमन्त्रः—न्याससहितः.

PAÑCADAŚĀKṢARĪMANTRAḤ WITH NYĀSA.

Foll. 22a—23b.

Similar to the work described under No. 6548 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

मार्कण्डेयस्य बाणाः (५) सुरधनपतिरब्धिसङ्ख्याः (४) समार्धे
पक्षौ (२) तारा महर्षेः (२७) सरसिरुहजनेर्भूः (८) सुधांशुर्मृगारेः ।
देव्या सूर्याः (१२) सुराणां त्रिगुणितशशिनः शुम्भदूतस्य हस्तौ (२)
सर्वाश्चोवाच वाचस्तुरगशरमिता (५७) मन्त्ररूपा हि चण्ड्याः ॥

End:

मू—क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ऐं ह्रीं श्रीं महालक्ष्मि कमलधारिणीं स्वाहा ॥

Foll. 24—27 contain a few lines of Argalastōtras.

R. No. **1270.**

Palm-leaf. $12\frac{1}{4} \times 1\frac{1}{3}$ inches. Foll. 5. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Rāmacandra Rao of Śāmalkōṭa.

सामुद्रिकलक्षणम्.

SĀMUDRIKALAKṢAṆAM.

Same work as that described under R. No. 1248 (*a*) *ante.*

Incomplete.

R. No. **1271.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 20. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. Rāmacandra Rao of Śāmalkōṭa.

(*a*) **ग्रहनिघण्टुः.**

GRAHANIGHAṆṬUḤ.

Fol. 1.

Synonymous names relating to the nine planets given in the form of stanzas.

Complete.

Beginning:

आदित्यार्को रविर्भानुर्भास्करश्च दिवाकरः ।
मार्ताण्डस्सविता हेळिः तीक्ष्णांशुश्च दिनोरविः(नाधिपः) ॥
चन्द्रः शशी शशाङ्कश्च विधुस्सोमो निशाकरः ।
शीतांशुरुडुनाथश्च मृगाङ्केन्दुश्च चन्द्रमाः ॥

End:

छायाग्रहंशिखी चैव केतूः पारवं भृत् (?) ।
मृत्युपुत्रनलश्चेति नामान्यन्यानि योजयेत् ॥

Colophon :

इति ग्रहनिघण्टुस्समाप्तः ॥

(*b*) भावनिघण्टुः.

BHĀVANIGHANṬUḤ.

Foll. 2*a*—2*b*.

Synonymous names relating to the Bhāvas *i.e.*, houses or divisions associated with the signs of the zodiac given in the form of stanzas.

Complete.

Beginning :

क्षितिजोदंजयो राशिलग्नं होरादयस्तनुः ।
कलचो विलग्नमात्मानं भावो मूर्तिर्हरिस्मरः ॥
द्वितीयं द्रविणं ज्ञातिकुटुम्बं वित्तमेव च ।
धनं कोशो द्रयं वक्षो नेत्राक्षिनयनादिषु ॥

End :

द्वादशस्तु द्वयोरन्त्यारिष्टो मावाप्यरु(हात्म्यमु)च्यते ।
मन्त्री सूर्यप्रभाभानुस्सचिवो द्वादशांशके ॥

Colophon :

इति भावनिघण्टुस्समाप्तः ॥

(*c*) संज्ञानिघण्टुः.

SAṀJÑĀNIGHANṬUḤ.

Foll. 3*a*—4*a*.

Synonymous names relating to certain technical terms occurring in astrology given in the form of stanzas.

Complete.

Beginning :

एकस्य संज्ञा भूरूपं कुचन्द्राश्वप्रकीर्तिताः ।
भूनामश्चन्द्रनामाश्च प्रथमं तु प्रकीर्तिताः ॥

द्विसंज्ञिकौ दस्रयुग्मनेत्राक्षियमलो यमः ।
पक्षद्वयं करो हस्तौ नयनानि भुजौ करौ ॥

End:

रदना रशना दन्ता द्वात्रिंशद्ध . . . संज्ञकाः ।
त्रयस्त्रिंशश्च दैवज्ञैरेवं नामानि योजयेत् ॥

Colophon:

इति संज्ञानिघण्टुस्समाप्तः ॥

(*d*) ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Foll. 4*b* – 20*b*. Fol. 13*b* is left blank.

Deals with many topics in astrology. In the beginning are found mentioned the initial letters of the names of different persons and the Nakṣatras or lunar mansions that are associated with the respective initial letters.

Incomplete.

Beginning:

चु चे चो ला— अश्विनी। ली लु ले लो— भरणी। अ इ उ ए— कृत्तिका। ओ वा वि वु—रोहिणी। वे वो का की—मृगाशिरः। कु ख ङ छ—आर्द्रा। के को ह हि—पुनर्वसुः।

End:

ग्रामार्पणम्—

नराकारं लिखेच्चक्रं साभिजिदृक्षसंयुतम् ।
. . . . ग्रामनामर्क्षपर्यन्तम् ॥

R. No **1272.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 82. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913-14 by M.R.Ry. Susarla Kumārasvāmi Śāstri of Pedakallepalle.

(*a*) अन्तर्दशामहादशाफलानि.

ANTARDAŚĀMAHĀDAŚĀPHALĀNI.

Foll. 1*a*—18*a*.

A treatise in astrology describing the influences good and evil caused by the various planets in the planetary period as well as in the sub-periods into which a planetary period is divided.

Incomplete.

Beginning:

विशुद्धविज्ञानघनस्वरूपं (.) देवं हयग्रीवमहं प्रपद्ये ।।
रव्यादिग्रहाणामन्तर्दशामहादशाफलानि लिख्यन्ते—
सूर्यमहादशायां वर्षाः ६ फलम्—
मूलात्रिकोणस्वर्क्षे वा स्वोच्चे वा परमोच्चगे ।
केन्द्रात्रिकोणलाभस्थे भाग्यकर्मेशसंयुते ॥
बलपूर्णसमायुक्ते रवौ वर्गबलैर्युते ।
तस्मिन्नाये महत्पुण्यं धनभावाधिकं शुभम् ॥

End:

द्वितीयद्यूननाथे तु रन्ध्ररिष्फसमन्विते ।
देहजाड्यं मनोभङ्गमपमृत्युभयं तथा ॥
श्वेताङ्गां महिषीं दद्याद्दानेनारोग्यमादिशेत् ।
चन्द्रमहादशायां . . . . तथैवात्रापि वक्तव्यम् ॥

Fol. 10*b* and 18*b* are left blank.

(*b*) धर्मशास्त्रविषयवचनानि.

DHARMAŚĀSTRAVIṢAYAVACANĀNI.

Foll. 19*a*—29*a*. Fol. 29*b*—33*b* are left blank. Foll. 34*b*—35*b* contain a few lines of Ambākīrtanas in Telugu language.

A collection of stanzas on miscellaneous topics in Dharmaśāstra.

Incomplete.

Beginning:

ब्राह्मणाद्विप्रकन्यायां ज्ञा चौग्य(योग्यो जा)तश्शिवाद्विजः ।
अधीत्यागमशास्त्राणि नित्यं कुर्याच्छिवार्चनम् ॥

ब्राह्मणाद्राजकन्यायां दैत्योद्वाहो न सम्भवः। विवाहाद्रक्षकेनायं नाम्ना वैखानसः। तस्य वृत्तिः विष्णोश्च पूजनम्। एतत्पृथिवीचन्द्रोदये तिलहोमनिषिद्धकालः—

अमायां द्वादशे रिक्ते भृगौ भौमार्कवासरे।
तिला व्रीहिहता पूर्णा गच्छेत्कर्ता च याज्ञिकः॥

End:

सापिण्ड्यं चेत्कृतं भर्तुः भर्त्रानेन सपिण्डनम्।
सापिण्ड्यं श्वशुराभ्यां तु गुरुतल्पसमं स्मृतम्॥

इत्यादिबहुवचनविरोधात् भर्त्रैकेन सह सापिण्ड्यं कार्यं न तु श्वशुराभ्याम्।

तत्रायं प्रयोगः।

Foll. 29*b* – 33*b* are left blank. Foll. 34*a*—35*b* contain a few lines of अम्बाकीर्तन in Telugu language. Fol. 36 is left blank.

(*c*) नक्षत्रचूडामणिः.

NAKṢATRACŪḌĀMAṆIḤ.

Foll. 37*a*—82*a*. Fol. 82*b* is left blank.

Same work as that described under R. No. 371(*i*) *ante* but without Telugu meaning.

Complete.

R. No. **1273.**

Paper. 12 × 9⅜ inches. Foll. 276. Lines, 22 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Tiru Śrīnivāsavaradatātācāriyar of Villiyambākam, Chingleput district.

शतदूषणीव्याख्या—सहस्रकिरणी.

ŚATADŪṢAṆĪVYĀKHYĀ : SAHASRAKIRAṆĪ.

Same work as that described under No 5044 of the D.C.S. MSS., Vol. X. The author states that at the time of composing this work Kṛṣṇarāja was reigning at Mysore.

By Śrīnivāsācārya, son of Śrīśailadēśika of Śrīśailavaṁśa, who is considered to be an incarnation of Vēdāntadēśika. The work is intended to be a polemical refutation of the arguments advanced in Brahmānanda's Laghucandrikā.

Breaks off in the second Ullāsa.

Beginning:

आदौ हंसोऽथ मत्स्यस्तदुपरि समभूत्सैन्धवः कन्धरायां
भूयो नारायणात्मा पुनरपि भगवद्दा(द्दा)सरूपी शठारिः ।
नाथार्यो यामुनार्यस्तत इह भगवत्संयमीन्द्रस्तदेतत्
सर्वं श्रीवेदचूडागुरुवरवपुषा सार्थयन्नः परोऽव्यात् ॥

व्याख्याय स्वप्रबन्धान् विशदमविकलैर्वाजपेयादियज्ञैः
इष्टा(न्)धर्मान्यतीनामनितरसुशकानप्यनुष्ठाय भूयः ।
श्रीशं सन्तोषयिष्यन् श्रुतिशिखरगुरुर्यन्मयः प्रादुरासी-
च्छ्रीमच्छ्रीशैलसूरिर्जयति स यतिराड्भ्रामानुजाख्यः ॥

श्रीहयवक्त्रमुपास्य श्रीमच्छ्रीशैलदेशिकाकारम् ।
अधिशतदूषणि टीकां कुर्वे दृश्यत्वहेतुभङ्गस्य ॥

आत्मापि हसति नितरां किमुत परे साहसं मम त्वेतत् ।
पारं देशिकदृष्टिर्नीत्वापायात्तथापि परिपायात् ॥

प्रत्यूहगिरिनिर्भेदशतधारधुरन्धरः ।
श्रीमतो हयवक्त्रय हर्षहेषारवोऽवतु ॥

श्रीमत्कृष्णक्षितीन्द्रे जगदिदमवति श्रीमहीशूरपुर्यां
विद्वद्व्रातामरद्रौ निरुपधिकदयौदार्यचातुर्यसिन्धौ ।
तल्लब्धाभीष्टतुष्टाद्दशगतकिरणः श्रीनिवासोदयाद्रे-
रुद्भूतश्चन्द्रिकायाः प्रसरमभिभवन् हन्ति दुस्तर्कमोहम् ।

वादार्थं सङ्गृह्णन् मिथ्यावादनिराकरणस्य प्रकृष्टभगवत्प्रसादसाधनत्वं दर्शयति——अबाधादिति। अध्यक्षप्रभृतिमितिवर्गेषु अवधृतमिदं जगदबाधादन्तर्यमयितुं यस्य शरीरमित्यन्वयः। अवधृतमित्यस्य विषयीभूतमित्यर्थः।

* * * *

Colophon:

इति श्रीमदाण्डान् श्रीशैलकुलकलशोदधिकौस्तुभायमानभगवन्निगमान्तदेशिकापरावतारश्रीशैलदेशिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतौ सहस्रकिरणीसमाख्यायां शतदूषणीव्याख्यायां मिथ्यात्वविशेषनिर्वचनान्धकारनिर्मूलनं नाम प्रथमोल्लासः॥

श्रीमच्छ्रीशैलसूरीन्द्रं संप्रणम्य सहस्रशः।
सहस्रकिरणीग्रन्थे द्वितीयोल्लासमारभे॥

End:

दृश्यत्वानुमानं वह्न्यनुष्णत्वानुमानसमशीलमिति पूर्वोक्तदोषो दुरपह्नव इति भावः।

सिद्धिचान्द्रिकयोरुक्तो बाधोद्धारोऽपि सर्वशः।
मूलवाक्ये स्वरसतः प्रतिक्षिप्त इति स्फुटम्॥
ज्ञापनायात्र तद्ग्रन्थपङ्क्तिरेव विलिख्यते। अत्रोक्तं सिद्धौ.

R. No. **1274.**

Paper. $10\frac{7}{8} \times 8\frac{6}{8}$ inches. Foll. 158. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of Vaḍakku Tirumāḷigai of Āḻvār Tirunagari in the Tinnevelly district.

तत्त्वप्रबोधिनीव्याख्या—न्यायविलासः.

TATTVAPRABŌDHINĪVYĀKHYĀ : NYĀYAVILĀSAḤ.

A commentary on the Tattvaprabōdhinī of Gaṇēśadīkṣita, son of Gōvindadīkṣita, which work is described under No. 4119 of the

D.C.S. MSS., Vol. VIII: by Viśvanātha, son of Yallayārya and disciple of Brahmavidyātīrtha.

Contains the Paricchēdas Pratyakṣa, Anumāna, and Upamāna complete and Śabda incomplete.

Beginning:

कैलासे रावणोद्धूते परिरम्भोद्यतां शिवाम् ।
भियैव सस्मितं पश्यन् पातु मां चन्द्रशेखरः ॥
विघ्नौघमत्तेभविदारणार्थमिवाङ्कुशासक्तकरं गणेशम् ।
विघ्नोपशान्त्यै विमलेन्द्रचूडं बालार्कवर्णं सततं स्मरामि ॥
द्विजसङ्घसमाकीर्णं हंसश्रेणिसमावृतम् ।
अस्मत्कुलगुरुं ब्रह्मविद्यातीर्थमहं भजे ॥
यदन्तेवासिशरभैर्वादिकेसरिणो जिताः ।
तं तातं सर्वतन्त्रज्ञं यल्लयार्यं गुरुं नुमः ॥
व्याख्यां तत्त्वप्रबोधिन्या विश्वनाथस्तु मातरम् ।
नत्वा न्यायविलासाख्यां वितनोति यथामति ॥

स्वचिकीर्षितग्रन्थपरिसमाप्तिप्रतिबन्धकनिवृत्तये कृतं मङ्गलं शिष्यशिक्षायै शिष्टाचारोल्लङ्घनेन स्वस्य प्रमत्तत्वशङ्कया स्वकृतग्रन्थस्य प्रेक्षावदनुपादेयतावारणाय च ग्रन्थतो निबध्नाति—केशकेशवरूपैरिति। अनेकसुरासुरवन्द्यात्रिमूर्त्यात्मकत्वाद्यभिधानादवश्यं नमस्कार्यत्वं गणेशस्योक्तमिति ध्येयम्। पितरौ नमस्कुर्वन् चिकीर्षितं प्रतिजानीते—गोविन्देति। ननु बालोऽपीत्यादिना ग्रन्थकारेण स्वकृतग्रन्थस्य सुखदुःखाभावान्यतरफलानभिधानान्निष्फलग्रन्थकर्तुः प्रमत्तत्वशङ्कया प्रेक्षावत्प्रवृत्त्यनुपपत्तिः।

* * * *

श्रीमद्यल्ल(य)सूरीन्द्रपादाम्भोरुहरेणवः ।
हरन्तु मतिकालुष्यं दिशन्तु कुशलं मम ॥

Colophon:

इति प्रत्यक्षपरिच्छेदः ॥

End:

सङ्गतिमभिधाय उपमानानन्तरनिरूपणे हेतुमाह— सौत्रेति । तथा-चोद्देशक्रमादेव निरूपणक्रम इति भावः । उद्देशक्रमे च इच्छैव नियामिकेति ध्येयम् ।

* * * *

अत्र प्रतिभाति — योग्यतासहकारिविरहप्रयुक्तयावत्कार्यप्रतियोगिकानादिसंस्कार.

R. No. **1275.**

Paper. 10⅞ × 8½ inches. Foll. 267. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of Vaḍakku Tirumāḻigai of Āḻvār Tirunagari.

शारीरकप्रदीपिका—मूलमन्त्राक्षरार्थप्रबोधिका.

ŚĀRĪRAKAPRADĪPIKĀ : MŪLAMANTRĀKṢARĀRTHA-PRABŌDHIKĀ.

An original work on Śrīvaiṣṇavism maintaining that the meaning of the Tirumantra or Mūlamantra is explained in the Brahmasūtras : by Varadadēśika, son of Vēnkaṭācārya of Vādhūla family. The author refers in the introduction to Śārīrakasaṅgraha of Varadanārāyaṇaguru and to Śārīrakadarpaṇa of Vādhūla Vēṅkaṭācārya and pays his respectful homage to a number of Śrī-Vaiṣṇava-teachers.

Contains the following Adhikāras :—

(१) अर्थपञ्चकाधिकार, (२) तत्त्वत्रयनिर्णयाधिकार, (३) मूलमन्त्राधिकार and (४) श्रीविभुत्वाधिकार.

Beginning:

श्रीमते रम्यजामातृमुनये विदधे नमः ।
यत्स्मृतिः सर्वसिद्धीनामन्तरायनिवारिणी ॥

यश्चकार वचोभूषां लोकाचार्यं भजामि तम् ।
यत्पदाम्बुजसेवा मे सूते सर्वार्थसम्पदः ॥

ये सौम्यजामातृमहामुनीशितुर्नियोगतो दिग्गजनामदेशिकाः ।
तान्नौमि शारीरकशास्त्रगर्भितं प्राचीकशन्मन्त्रपदाक्षरादिकम् ॥

चक्रे वाधूलवरदनारायणमहागुरुः ।
वरयोगिनियुक्तस्सन् श्रीशारीरकसङ्ग्रहम् ॥
वाधूलवेङ्कटाचार्यो वरदार्यनियोजितः ।
चकार सर्वशास्त्रज्ञः श्रीशारीरकदर्पणम् ।

तत्तद्व्याकृतिरूपां वेदान्तोभयार्य(न्तगुरोः) मतानुसारी(रेण) ।
वाधूलो वरदार्यः शारीरक[प्र]दीपिकां व्यधायि(दधात्) ॥
यः स्वापकाले वरयोगिचोदितः शारीरके शास्त्रवरे व्यदर्शयत् ।
अष्टार्णमन्त्रार्थवरानतिस्फुटं वाधूलमार्यं वरदं भजामि तम् ॥

* * * *

चार्वाकः शान्तगर्वः कपिलविलपनं लूनमैशी कृशा वाक्
जैनो लीनाभिमानो विलयमलभतासह्यबाह्यप्रलापः ।
काणादः क्षीणनादो विधिकृतिरगतिर्भङ्गुरा शंकरोक्ति-
र्भद्रं यस्मिंस्त्रिवेदीं भजति स तु मुनिर्लक्ष्मणो रक्षतान्नः ॥

जीयात्स लक्ष्मणमुनिः परमात्मसेवायोगापरोक्षितपरावरतत्त्वसारः ।
यो भाष्यकृच्छ्रुतिशिरस्स्मृतिसूत्रवेधाः कल्युल्बणप्रशमनः श्रितबन्धहारी ॥

यः संस्कृतद्रविडरूपसमस्तवेदस्मृत्यर्थभावमथ वाक्यमहारहस्यम् ।
तं नौम्यहं वचनभूषणमर्थजातश्रेयोदुहं व्यरचयज्जगदार्यवर्यम् ॥

* * * *

श्रीमद्रामानुजार्यामलसुर(विबुध)नदीप्लाविताशेषलोको
विद्यासंपन्निषद्या कविकथकघटामस्तकन्यस्तपादः ।

अव्याद्दिव्यैः प्रबन्धैः श्रुतिशिखरगुहादीपमालासुगन्धै-
र्वेदान्ताचार्यवर्यो गुणनिधिरिह मां सर्वतन्त्रस्वतन्त्रः ॥

व्यासं नाथमुनीन्द्रयामुनमुनिश्रीलक्ष्मणार्यान् सदा
कूरेशं कुरुकेशविष्णुहृदयव्यासार्यतद्देशिकान् ।
श्रीरामानुजवेङ्कटेशवरदश्रीवादिभीकृद्गुरून्
भक्त्याहं रणपुङ्गवार्यवरदार्यौ वेङ्कटार्यान् भजे ॥

* * * *

श्रीकृष्णकृष्णचरणौ जगदार्यसौम्यजामातृदेववरयोगिमहामुनीन्द्रान् ।
श्रीमन्नभोगिरिमुनिं रणपुङ्गवार्यं वन्दे सदा वरददेशिकवेङ्कटार्यौ ॥

निधानं विद्यानां निगमगणरत्नाकरशशी
फलं नृ(नः)पुण्यानां प्रणतजनताकल्पलतिका ।
गुणानां मञ्जूषा कुमतिकुहनाकू(तू)लदहनो
दयाराशिः श्रीमान् जयति वरदो देशिकवरः ॥

यद्गोष्ठी शठजिद्यतीश्वरवचस्तत्त्वार्थसंदर्शिनी
यच्चिन्ता द्रुतशर्कराप्रतिनिधिः शीताश्रु यल्लोचनम् ।
यन्मूर्तिर्यतिराजवाक्प्रवचने नालीकनालाकृतिः
सोऽयं वेङ्कटदेशिको विजयतामाकल्पमव्याहतम् ॥

श्रीरङ्गनायकवितीर्णतदाख्ययोगी
स्वप्ने ममैव कृपया परया प्रसन्नः ।
संदर्शयेति मनुराजपदाक्षरार्थान्
शारीरकाधिकरणैः समचूचुदन्माम् ॥

स्वयं यतीन्द्रप्रवणो हृदि स्थितः संस्मारयेन्मे श्रुतं श्रोत्रभावितम् ।
मन्त्राक्षरार्थाकृतिसत्कृतिर्मया स कारयेच्चेदभयं करोमि ताम् ॥

कृष्णद्वैपायनो भगवान् व्यासः शारीरकमहाशास्त्रसूत्रकारः । भगवानस्य बोधायनो वृत्तिकारः । भगवान् ब्रह्मनन्दी वाक्यकारः । टङ्क-द्रमिडगुहदेवा भाष्यकाराः । एते ह्युत्तरमीमांसाप्रवर्तकाः । तथा श्रीमान् शठकोपयोगी द्राविडब्रह्मदर्शी । श्रीमत्परकालविष्णुचित्तादयः तदुपबृंहणदर्शिनः । श्रीमन्नाथयामुनप्रभृतयस्तदुभयव्याख्यातारः । श्रीमान् रामानुजमुनिस्तु द्राविडब्रह्मानुरोधेन पूर्वोक्ततत्तच्छास्त्रप्रवर्तकग्रन्थाविरोधेन स्वेतरकुदृष्टिदर्शनं निराकरिष्यन् स्वदर्शनं निरवद्यं निष्कण्टकं स्थापयिष्यन् निखिलवैदुष्यमूलं श्रीभाष्यं महासमर्थं चकार । श्रीमत्कूरेशकुरुकेशव्यासपाराशर्यसोमयाजीशकलिवैरिदासजगदाचार्यादयः संस्कृतद्राविडब्रह्मभाष्यप्रवर्तकाः । तत्तदाचार्योक्तप्रबन्धप्रसक्तादिव्यसूक्तिभिरेव ब्रह्मसूत्रान्तःस्थमूलमन्त्रपदाक्षरार्थप्रबोधकतया शारीरकप्रदीपिकाह्वया कृतिरिदानीं क्रियते । इदं त्वत्र विचार्यते—किमिदं शारीरकं शास्त्रं मूलमन्त्रादिबोध्यसारतमार्थजातं प्रतिपादयति, उत, नेति संशयः ने[ती]ति पूर्वपक्षः । प्रतिपादयतीति राद्धान्तः ।

* * * *

Colophon :

इति श्रीवाधूलकुलतिलकवेङ्कटाचार्यसूनोः वरददेशिकस्य कृतौ मूलमन्त्रपदाक्षरार्थप्रबोधिकायां शारीरकप्रदीपिकायामर्थपञ्चकाधिकारः प्रथमः ॥

End :

वेदान्ताचार्यैश्च चतुःश्लोक्यधिकारादिषु विभुत्वमुपपादितम् । यतश्चास्यां सत्यत्वादिवत् स्वरूपनिरूपकवर्गेषु प्रधानतया निरूपकत्वं सर्वदेशिकसंमतम्, अतः प्रमाणोपपत्तिसंप्रदायैर्न्यायतश्च श्रियो विभुत्वं सिद्धम् ॥

Colophon :

इति वाधूलकुलतिलकवेङ्कटाचार्यसूनोः वरददेशिकस्य कृतौ मूलमन्त्राक्षरार्थप्रबोधिकायां शारीरकप्रदीपिकायां परतत्त्वनिर्णयपूर्वकलक्ष्मीविभुत्वसमर्थनं नामाधिकारश्चतुर्थः ॥

R. No. **1276.**

Paper. 10¾ × 8½ inches. Foll. 111. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of Vaḍakku Tirumāḻigai of Āḻvārtirunagari, a village in the Tinnevelly district.

वेदान्तरत्नाकरः.

VĒDĀNTARATNĀKARAḤ.

A treatise explaining the principles of the Viśiṣṭādvaita school of the Vēdānta and written in accordance with the views of Rāmānuja: by Rāmānujavipaścit of Śrī-Vatsagōtra. The author herein mentions the Śrutaprakāśikā of Sudarsanasūri and Śatadūṣaṇi of Vēdāntadēśika.

Complete.

The original manuscript, from which this work has been transcribed for the library, is said to have been copied for Vaḍakku Tirumāḻigai and Mērku Tirumāḻigai, the copying having been completed on Wednesday, the 2nd day of the dark fortnight of the month of Jyeṣṭha in the year Vikṛti.

Beginning:

लक्ष्मीशं शोभितोरस्कं निर्धूताखिलकल्मषम् ।
वन्देऽहं सद्गुणारामं शेषाद्रीशानमन्वहम् ॥
श्रीपराङ्कुशयोगीन्द्रं सद्गुणैकनिकेतनम् ।
भजे नित्यं ममाचार्यं तापत्रयनिवृत्तये ॥
रामानुजमुनीन्द्रादीन् पूर्वाचार्यान् भजेऽनिशम् ।
यत्कृपा भगवज्ज्ञानपूर्तिं मे संविधास्यति ॥
श्रीवत्सान्वयसम्भूतरामानुजविपश्चित ।
क्रियते निगमान्तार्थरत्नाकरकृतिः शुभा ॥

इह खलु द्वापरादौ जगति ज्ञानेऽन्यथाभूते ब्रह्मरुद्रादिविज्ञापितकार्यः पुरुषोत्तमावतारो भगवान् व्यासः पाराशर्यः सकलजगदुज्जिजी-

वि(वयि)षया उत्सन्नान्वेदानुद्धृत्य बहुधा विभज्य तत्र वेदान्तार्थविशदीकरणाय ब्रह्मसूत्राणि चकार ।

* * * *

तत्र च सूत्रव्याख्यातृभिः शङ्करयादवप्रभृतिभिः स्वस्वमतिविजृम्भितकुयुक्तिकण्टकशतैः मुक्तिघण्टापथे चिते सति भगवान् पुनर्विचिन्त्य भवभयादितप्तजनविषयकरुणया श्रीमद्भगवद्रामानुजविरचितश्रीभाष्यादिप्रबन्धमुखेन विविधकण्टकनिरसनं चकार । अत एवानतिविततगहनगम्भीरश्रीभाष्यार्थविशदीकरणाय पूर्वमीमांसादिन्यायमांसला श्रुतप्रकाशिका श्रीमत्सुदर्शनभट्टैरकारि । अनन्तरं वेदान्ताचार्यप्रमुखपूर्वाचार्यैः शतदूषण्यादिप्रबन्धमुखेन उपष्टब्धं च ।

End:

परमप्रतिदोषत्वे सिद्धे हि रूपस्वपरानिर्वाहकत्वमिति भावरूपाज्ञानस्य पारमार्थिकदोषानभ्युपगमस्तावन्न जगद्भ्रान्तिरुपपादिता भवति ॥

Colophon:

इति वेदान्तरत्नाकरे भावरूपाज्ञानस्वरूपप्रमेयानुपपत्तिर्निरूपिता ॥

Foll. 111*b*—112*a* are left blank. On Fol. 112*b* is given the colophon.

इति वेदान्तरत्नाकरः सम्पूर्णः ॥

R. No. 1277.

Paper. 11⅓ × 9 inches. Foll. 72. Lines, 19 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of Vaḍakku Tirumāḷigai of Āḻvārtirunagari.

तर्कभाषाभावप्रकाशिकाव्याख्या—न्यायविवेकः.
TARKABHĀṢĀBHĀVAPRAKĀŚIKĀVYĀKHYĀ : NYĀYAVIVĒKAḤ.

A commentary on the Tarkabhāṣābhāvaprakāśikā of Gōpīnātha, which work is described under No. 4124 of the D.C.S. MSS., Vol. VIII: by Anantārya, son of Appayārya.

Contains the Pratyakṣaparicchēda only.

Beginning:

आकुञ्चिताधरपुटे विनिवेश्य वेणुमापूर्य तत्र विवराणि मुखानिलेन ।
आलोकयन् विविधवल्लवबालकेलीः आभीरवंशविजयः सततं ममास्तु ॥
व्याख्यां न्यायविवेकाख्यामनन्तार्यः स्वमातरम् ।
नत्वा भावप्रकाशस्य वितनोमि यथामति ॥

प्रारिप्सितग्रन्थस्याशेषविघ्नोपशमाय विशिष्टेष्टदेवतास्मरणात्मकं मङ्गलं मनसा कृत्वा शिष्यशिक्षायै ग्रन्थतो निबध्नाति—साकूतेति । पुनरिष्टदेवतां नमस्कुर्वन् स्वग्रन्थे प्रेक्षावदुपादेयत्वसिद्धये स्वस्य वैदुष्यं प्रसिद्धनाम च कीर्तयन् चिकीर्षितं प्रतिजानीते—गोपीनाथेनेति । ननु सकलशिष्टैः प्रारिप्सितादौ मङ्गलकरणादनेन चाकरणात् कथमेतद्ग्रन्थे प्रेक्षावत्प्रवृत्तिरित्यत आह—कर्तव्येति । कर्तव्यग्रन्थस्य विघ्नविघातकमित्यर्थः । मनसैवेति । ननु मानसिकमङ्गलं कृतमित्यत्र मानाभावः । नच समाप्तिरूपकार्यादेतद्ग्रन्थकर्तुर्मङ्गलं कारणमनुमीयत इति वाच्यम्, तथा सति विघ्नविघातकमित्यस्यासांगत्यापत्तेः ।

End:

वस्तुतस्तु प्रमेयमिदमित्यनुगतबुद्धौ नातद्व्यावृत्तेर्विषयत्वसंभवः । प्रमेयत्वावच्छिन्नप्रतियोगि(ता)कभेदाश्रयस्याप्रमेयस्याप्रसिद्धेः । अतस्तत्राकामेनापि उपाधिरूपप्रमेयत्वसामान्यविषयत्वमङ्गीकार्यमित्यन्यत्रापि अनुगतबुद्धौ भावरूपसामान्यविषयत्वासिद्धिः । इयांस्तु विशेषः—यत्प्रमेयत्वादौ जातिबाधकवशान्न जातित्वम् । अपरत्र तदभावात् घटत्वादेर्जातिरूपत्वमिति संक्षेपः । एतत्सर्वमभिसंधायाह—अलमतिप्रसङ्गेनेति ॥

Colophon:

इति श्रीमहोपाध्यायाप्पयार्यतनुजानन्तार्यकृतौ भावप्रकाशव्याख्यायां न्यायविवेकाख्यायां प्रत्यक्षपरिच्छेदः संपूर्णः ॥

R. No. 1278.

Paper. 11⅜ × 8¾ inches. Foll. 181. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of Vaḍakku Tirumāḻigai of Āḻvārtirunagari.

ज्ञानार्णवः.

JÑĀNĀRṆAVAḤ.

A treatise bearing on the Śrī-Vaiṣṇava religion: by Śrīraṅgarāja Yajvan, son of Abhayaprada.

Contains the Paricchēdas one to six complete.

Beginning:

. . . . पदं हृदि ।
भिद्ध्चा(अथ विद्या)प्रभावेन भिद्यते भवजं भयम् ॥
गिरामनेकभेदानां भगवत्येककण्ठताम् ।
व्याचक्रे यं करोम्येनं हृदि रामानुजाह्व(यम्) ॥
. . . . . खान् सर्वान् . . . . महामुनीन्
त्रयी यदुक्तिमालम्ब्य त्रैलोक्यं क्रमतेतराम् ॥
सर्वे यत्रैकतां यान्ति वेदाः साङ्गोपबृंहणाः ।
यं विदित्वा . . . . . भजे हरिः(म्) ॥
अर्थमाचार्यवर्येभ्यः श्रुतं श्रुतिशिरोगतम् ।
धर्मशास्त्रेतिहासादिवचनैः समुपास्महे ॥

सर्वोऽप्यर्थः सबु . . . . निरूप्यमाणो भवति न विस्रम्भाय, अन्यथाभावसंभवात् । किं पुनर्वेदार्थः । अतो वेदविदां परमर्षीणां वचनैरनुसन्धेयः । . . . . त्वात् । स्मृतमेवं व्यासेन—

'वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेदपि ।
ऋषिभिर्निश्चिते तस्मिन् का शङ्का स्यान्महात्मनाम् ॥'

इति । तत्र वेदार्थ . . . . . न्तावत् प्रत्यक्षादिकं प्रमाणं सुवि(दि)तं कार्यं भवति । यथाह मनुः—

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिम . . . . ॥

विविधागमं शास्त्रमित्येतद्विविधोपकारकशास्त्रोपेतं वेदशास्त्रमिति . चिद्याचक्षते तथाभूतस्यैव वेदस्य धर्मज्ञानहे(तुत्वा)त् ।

* * * *

Colophon:

श्रीरङ्गराजयज्वना विरचिते ज्ञानार्णवे प्रथमः परिच्छेदः ॥

End:

जन्मप्रभृति येषां वै भक्तिर्नारायणे भवेत् ।
ते . . . . देवि न भूतो न भविष्यति ॥

. . . , धान्यतरशब्देन तस्यैव पुरुषार्थसूचनात् प्राप्त्यभावेऽपि न तां भावयेदित्यभिप्रायः । अनादयमानोऽपि भक्तिं न परि . . . . भक्तानुकम्पी भगवान् भूयते पुरुषोत्तम इति ऋग्विधानात् ॥

Colophon:

एवमभयप्रदसूनुना सकलविद्यापारगेण श्रीरङ्गराजयज्वना विरचिते ज्ञानार्णवे षष्ठः परिच्छेदः ॥

R. No. **1279.**

Paper. $10\frac{3}{4} \times 8\frac{5}{8}$ inches. Foll. 31. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Gōvindācār of Tirupati.

तर्कसंग्रहचन्द्रिकाव्याख्या—कुवलयोल्लासः.

TARKASAṄGRAHACANDRIKĀVYĀKHYĀ: KUVALAYŌLLĀSAḤ.

A commentary on the Tarkasaṅgrahacandrikā of Mukundabhaṭṭa, which work is described under No. 4153 of the D.C.S. MSS., Vol. VIII: by Mahāmahōpādhyāya Śrī-Kṛṣṇa Tātācārya of Tirupputkuḻi, son of Dēśika Tātācārya of Lakṣmīkumāra family and a disciple of Divāpradīpa Vēṅkaṭācārya and Śrīnivāsayati.

Breaks off in the Pratyakṣakhaṇḍa.

Beginning:

रघुकुलजलधौ जातं संश्रितसंतानमाश्रये कंचित् ।
अधिकोन्नतेरपि यतो विनतैरग्र्यं फलं करग्राह्यम् ॥
तुषारधरणीधरस्फुरदुदारकोटीतटी-
निरर्गलविनिर्गलद्विबुधवाहिनीविभ्रमैः ।
वचोभिरवनीतले कुमतिगर्वसर्वंकषो
मम स्फुरतु मानसे सपदि वेदचूडागुरुः ॥
श्रीश्रीवासयतीन्दुर्विलसतु सर्वज्ञशेखरो हृदये ।
यत्पादसङ्गमात्रात्तमसामुदयः सुदूरमपसरति ॥
श्रीमद्विद्याप्रदीपख्यातमहाबिरुदवेङ्कटार्यगुरोः ।
न्यायमहाम्भोधीन्दोश्चरणसरोजद्वयं सदा सेवे ॥
लक्ष्मीकुमारगुरुवंशपयःपयोधि-
राकातुषारकिरणस्य गुणैकराशेः ।
श्रीदेशिकस्य तनयः सुधियां हिताय
कृष्णाभिधः करुणया तनुते निबन्धम् ॥
मुकुन्दभट्टरचितां तर्कसंग्रहचन्द्रिकाम् ।
गूढां कुवलयोल्लासो विशदां कलयत्वयम् ॥

विघ्ननाशाय रचितं मङ्गलं शिष्यशिक्षायै अध्येतॄणामनुषङ्गतो मङ्गलसंपत्तये च ग्रन्थतो निबध्नाति—गलदिति । गणेशप्रार्थनाया अनायासेनैव विघ्ननिवारकताया आगमसिद्धतया गणेशस्य ग्रन्थकृदिष्टदेवतया च तत्प्रार्थनमेवादौ कृतम् । शैलदुहितुः शिशुः भव्यमिष्टसाधनविघ्नध्वंसरूपं वितरत्विति संबन्धः ॥

End:

पाञ्चभौतिकत्वे भूतपञ्चकजन्यत्वे । क्लेदः स्वेदः । अनुवृत्तेः साक्षात्कारात् । तथाच गन्धरूपव्यञ्जकबलेन सदानुभूयमानं पृथिवीत्वमेवास्मदादि-

शरीरे स्वीकार्यम् । नतु जलत्वादिकमिति भावः । अयोनिजदेहादीति अयोनिजा देहो येषामिति बहुव्रीहिबलादात्मपरोऽयम् । तेन नात्मविशेषवाच्य-स्मत्पदसमभिव्याहृतादिपदग्रा.

Colophon :

इति श्रीमहामहोपाध्यायश्रीकृष्णतातार्यकृता तर्कसंग्रहचन्द्रिकाव्याख्यायां कुवलयोल्लासाख्यायां यावान् भागो लब्धस्तावानेवायं लिखितः ॥

R. No. **1280.**

Paper. 12 × 9½ inches. Foll. 281. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of A. V. Narasiṁhācārya of Agaram, a village in the Chingleput district.

Bound in two volumes.

गुरुभावप्रकाशिकाव्याख्या.

GURUBHĀVAPRAKĀŚIKĀVYĀKHYĀ.

A commentary on the Gurubhāvaprakāśikā of Lakṣmaṇārya, which work has been described under No. 4970 of the D.C.S. MSS., Vol. X.

Wants the beginning and end.

Beginning :

अत्रायमनुसन्धेयः—'परस्तस्मात्' इत्यादिश्लोकद्वयोपादानानन्तर-मितिशब्दाभावात् अथेत्याद्यवतारिकाया व्याख्येयं दर्शयति—पर इत्यादि । परमगतिशब्दस्वारस्यात् अपुनरावृत्तिप्रसिद्धेश्च भगवत्परत्वं श्लोकद्वयस्या-शङ्क्याह—अयमभिप्राय इति । भूमिराप इत्यादि ।

अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ॥
जीवभूतां महाबाहो ययेदं धार्यते जगत् ।

इत्यत्र परशब्दान्यशब्दयोरत्र प्रत्यभिज्ञानात् मे प्रकृतिमिति जीवस्य भगवत्संबन्धित्वोक्तेः ।

End:

अतः स्वेतरसर्वचेतनविषयकचेतनकर्तृकज्ञानप्रयो . . . .

(मातृकायामेतावदेव.)

कैवल्यविषये सम्यक् संग्रहः क्रियते स्फुटम् ।
अत्यन्तविस्तृतार्थानां बुद्धिसौकर्यसिद्धये ॥
केवलानां ब्रह्मलाभो न सुखं नातिशायि च ।
न चोपायादिषु तथा न सर्वविषयेष्वपि ॥
कदाचिदपि नैवं स्याद्दुःखं च ज्ञानिनं प्रति ।
तच्चातिशायि नित्यं च ततश्च तदपेक्षया ॥
ज्ञानिनां ब्रह्मलाभस्य वैषम्यं दशधेरितम् ।
अथ प्रमाणोपपत्तिसंप्रदायाः प्रदर्शिताः ॥
जीवप्रधानकोपास्तिः तद्य इत्थमिति श्रुता ।
इति ह्युपनिषद्भाष्यं प्राधान्यं चात्र भोग्यता ॥
अतो ब्रह्मशरीर्येव केवलैरनुभूयते ।
विशेष्यत्वस्यानियमाद्दतो न ब्रह्मभोग्यता ॥
तात्पर्यचन्द्रिकायामप्यष्टमाध्याय ईरितम् ।
केवलानां ब्रह्म भोग्यं नेति वेदान्तदेशिकैः ॥
आनन्दत्वावस्थया च हीनं ज्ञानमभोग्यता ।
आनुकूल्याख्यशक्तिश्च सुखत्वं भाष्यसंमतेः ॥
ज्ञेयज्ञानगतानन्दपदनानार्थतान्यथा ।
आनन्दो ह्यनुकूला धीर्नानुकूलस्य धीमतः ॥

R. No. 1281.

Paper. 11 × 9½ inches. Foll. 282. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of Tāṅgal Rāmasvāmi Śāstri of Viriñcipuram in the North Arcot district.

सिद्धान्तकौमुदीव्याख्या—सुमनोरमा.
SIDDHĀNTAKAUMUDĪVYĀKHYĀ : SUMANŌRAMÂ.

By Tirumalayajvan, son of Vēṅkaṭādhvarin and brother of Abbana and Sarvēśvarādhvarin who is a pupil of Upēndrayatīndra. The author is said to have learnt grammar under his brother Sarvēśvara.

Same work as that described under No. 1449 of the D.C.S. MSS., Vol. III; but with a different beginning as given below.

To the end of Pūrvārdha.

Beginning :

वन्दे देव्याः सरस्वत्या वन्दनीये पदाम्बुजे ।
यद्वन्दनेन मन्दोऽपि विन्देद्गुरुसमानताम् ॥
यो वेदगर्भमतनोद्विधिमात्मसृष्टं यः पञ्चवर्षमकरोद्ध्रुवमात्तवाचम् ।
सोऽयं समस्तजगतां सुहृदन्तरात्मा वाचः प्रसादयतु मे बुधसंमतार्थाः ॥
अष्टाध्यायीं दर्शयन्तीव साक्षाद्व्याख्यामुद्रा राजते यस्य हस्ते ।
भूयो भूयस्स्मारकं शेषयन्ती साक्षादीक्षे दक्षिणामूर्तिदेवम् ॥
वृद्धोपेन्द्रयतीन्द्रसान्द्रकरुणासंवृद्धषड्दर्शनः
श्रीषड्दर्शनवेङ्कटाध्वरिलसद्गर्भाब्धिचन्द्रोदयः ।
सौजन्यार्जितसर्वलोकविनुतप्रख्यातकीर्तिश्रियं
श्रीसर्वेश्वरसर्वतोमुखगुरुं सर्वेश्वरांशं भजे ॥
श्रीषड्दर्शनवेङ्कटाध्वरिसुतः षड्दर्शिनीवल्लभः
श्रीसर्वेश्वरसर्वतोमुखगुरोर्विद्यानिधेः सोदरः ।
विख्याताब्बनपौण्डरीकिसहजः सिद्धान्तकौमुद्यनु-
व्याख्यामातनुते बुधस्तिरुमलः श्रीद्वादशाहाध्वरी ॥
भट्टोजिदीक्षितगिरां स्वयमेव भावं सर्वेश्वराध्वरिवरोऽपि बुधाग्रगण्यः ।
शेषश्च वेद . . विशेषभावं शेषो न कश्चिदपि वेत्ति तथापि चित्रम् ॥

भट्टोजिदीक्षितमणेरनवद्यवाचां भावं तु यद्यपि न वेद्मि तथापि बोधे।
सर्वेश्वराध्वरिवरेण्यकृपाप्रभावभावस्वभावविभवो विभुतां विधत्ते॥

सर्वेश्वराध्वरीन्द्रेण पूर्णो भावः प्रकाशितः ।
स मया लिख्यते किंचिद्बालानां बोधसिद्धये ॥
भट्टोजिदीक्षितकलाधरलब्धजन्मा
सिद्धान्तयुक्तिपरिबृंहितकौमुदीयम् ।
विद्योतते दशदिशातमसां निहन्त्री
संस्फूर्तिदा कुवलयाधिकतोषहेतुः ॥
सिद्धान्तकौमुदी चेयमेषा च सुमनोरमा ।
भावाननुभवन्तोऽस्यां विहरन्त्वनया बुधाः ॥

R. No. 1282.

Paper. 11 × 9⅜ inches. Foll. 165. Lines, 20 in a page. Dēvanāgarī.. Good.

Transcribed in 1913–14 from a MS. of Taṅgal Rāmasvāmi Śāstri of Viriñcipuram.

काव्यप्रकाशव्याख्या—साहित्यचूडामणिः.

KĀVYAPRAKĀŚAVYĀKHYĀ : SĀHITYACŪḌĀMAṆIḤ.

A commentary on Mammaṭa's Kāvyaprakāśa : by Bhaṭṭagōpāla.

Breaks off in the tenth Ullāsa.

Beginning :

उपोद्घातो विवेकस्य वृत्तेः शब्दार्थयोर्द्वयोः ।
श्रेष्ठमध्यकनिष्ठानां काव्यानामनुशासनम् ॥
दोषाणां निस्तुषा चिन्ता गुणत्रयविनिर्णयः ।
वागर्थभावा शिक्षेति दशोल्लासा इति क्रमात् ॥
ध्वनिमर्यादयाप्यत्र काव्यस्यार्थः परीक्ष्यते ।
उल्लेखः काञ्चनस्येव निकषोपलरेखया ॥

कुशलस्य क्रियौचित्यं जडेन यदि शिक्ष्यते ।
बिम्बमप्यम्बरमणेर्भस्मना परिशोध्यताम् ॥

अथ वृत्तिकारः स्वकर्तृकाः कारिकाः परीक्षितुकामः विशिष्टविद्वज्जनानुष्ठितमादि . . . वर्तिनं माङ्गल्यमितिकर्तव्यताविशिष्टं व्याख्यातुं पीठिकां प्रतिष्ठापयति—ग्रन्थारम्भ इति । नमस्कारः शिष्टप्रयुक्तो मङ्गलाचार इत्येतावन्मात्रसंतुष्टखण्डिकोपाध्यायप्रस्थानातिक्रमणीह समुचितेति ।

End:

इत्थं प्रणीतानि परीक्ष्य पूर्वैः शब्दानुसारीणि विभूषणानि ।
यदेवमन्यत्परिवृत्तिरेखापराङ्मुखं तत्स्वयमूहनीयम् ॥

Colophon:

इति साहित्यचक्रवर्तिरौहित्यभट्टगोपालविरचितायां साहित्यचूडामणौ काव्यप्रकाशविमर्शिन्यां नवमोल्लासः समाप्तः ॥

वन्दे वाणीं महोत्कर्षमहोत्सवविहारिणीम् ।
सर्वाङ्गीणसमुन्मीलदमूल्यमणिभूषणाम् ॥
उपमानन्वयौ पूर्वमुपमेयोपमा ततः ।

* * * *

अत्र स्वेदान्य(दनाद्य)नेकक्रियाकर्तृत्वेन नवोढा काचिन्निर्दिश्यते । मालादीपकमिति । पूर्वपूर्वस्योत्तरोत्तरं प्रत्युत्कर्षनिबन्धनत्वेन माला ।

R. No. 1283.

Paper. $11 \times 9\frac{3}{8}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Tāṅgal Rāmasvāmi Sāstri of Viriñcipuram.

नलचरित्रम्.

NALACARITRAM.

A drama having the story of king Nala for its plot: by Nīlakaṇṭhadīkṣita of Bhāradvājagōtra, who is also the author of

several other works, viz., Mukundavilāsa, Kalivid̤ambana, Sabhārañjana, Anyāpadēśaśataka, Śāntivilāsa, etc. Particulars of the names of the author's ancestors and of the works written by them are mentioned in this work and they are given below :—

Accādīkṣita (had eight sons)

(fifth son) Raṅgarājāchvarin, author of the Advaitamukura and the Vivaraṇadarpaṇa.

- Accādīkṣita extolled by a poet named Guru.
- Appayādhvarin, author of 104 works, wrote the commentary on the Kalpataru; wrote the Śivārkamanidīpikā and was therefore honored by king Cina Bomma by means of a golden bath; extolled by Samarapuṅgavayajvan and Bālakavi.

Sons of Accādīkṣita:

- Nārāyaṇādhvarin wrote commentaries on the Sāhityaratnākara and the Mahāvīracarita.
- Appayadīkṣita, author of Rukminīpariṇaya.

Sons of Nārāyaṇādhvarin:

- Nīlakaṇṭhadīkṣita author of the Nalacarita.
- Accādīkṣita wrote a commentary on the Nalacaritra under notice.

The manuscript contains 1 to 6 Aṅkas complete and breaks off in the 7th Aṅka.

Beginning :

अद्भुतं किमपि द्वन्द्वमस्तु तन्मम शर्मणे ।
स्वस्तिकरतनुते यस्य सुहृदाश्लेषनिर्वृतिम् ॥

अपि च—

पत्युर्नेत्रे कराभ्यामपि च पिदधती लक्षिता फालदृष्ट्या
पश्चाल्लीनापि पीता सरभसमधरे पश्चिमेनाननेन ।

दीपे निर्वापितेऽपि प्रकटविहरणा चन्द्रिकाभिर्जटेन्दो-
र्ह्रीणा दृष्टा च भूयः प्रथमपरिचये पातु गौरी चिरं वः ॥

* * * *

